॥ श्रीः ॥

पाणिनीयशिक्षा

'प्रदीप'संस्कृत'प्रह्लाद'हिन्दीव्याख्यासहिता

अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा।
शास्त्रानुपूर्वं तद्विद्याद्यथोक्तं लोकवेदयोः ॥ १ ॥

आपदामपहर्तारं दातारं सर्वसम्पदाम्।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥

दुःखत्रयपराहताविवेकिनो दुःखत्रयनिवृत्तिकारणं कामयमाना नानाश्रुतिस्मृतीतिहासपुराणेषु ब्रह्मज्ञानमेव तदुपायमाकलयाम्बभूवुः । तत्प्राप्तिहेतुमपि पन्थानं जिज्ञासमानाः परमकारुणिकं पाणिनिं मुनिमुपसेदुः । अथ पाणिनिर्मुनिर्वेदाध्ययनं ब्रह्मसाक्षात्कारप्राप्तये परमः पन्था इति हृदि निधाय वेदाध्ययनञ्च शिक्षाध्ययनसाध्यमिति चाकलय्य शिक्षां प्रणेतुकामस्तेषामवधानाय प्रतिजानीते—

अथेति ॥ अथ शब्दःआनन्तर्ये । अथ शिष्यजिज्ञासानन्तरं पाणिनीयं मतं

अथ शिक्षामिति । अथशब्दः आनन्तर्यार्थः परिगृह्यते, शिष्यजिज्ञासानन्तरमिति तदर्थः । यत्त्वथशब्दो मङ्गलार्थः । युक्तं चैतत्, कथमन्यथा सदाचारपरम्परापरिप्राप्तकर्तव्यताकस्य मङ्गलस्य शिक्षां प्रणयतो महामुनेरनाचरणं संभाव्यते ? तथा चात्रापि अथशब्दो मङ्गलार्थ इति । तन्न, मङ्गलस्याथशब्दवाच्यत्वाभावात् । किन्तु शङ्खस्वनादिवत् श्रूयमाणोऽथशब्दो मङ्गलावह इत्यथशब्दस्यान्यार्थत्वपरत्वेऽपि मङ्गलं सिद्धम्, अन्यार्थमानीयमानोदकुम्भवत् । तदुक्तं शाङ्करभाष्ये—"अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवतीति" । अत एवोक्तं स्मृती—"ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकाविमौ।' इति स्पष्टमिदं रत्नप्रभाभामत्योरिति दिक् ॥ १ ॥

यथा=पाणिनीयमतमाश्रित्य शिक्षां=शिक्षानामकं वेदाङ्गं, प्रवक्ष्यामि=प्रकर्षेण कथयिष्यामि, तत्=शिक्षाप्रणयनम् यथोक्तं लोकवेदयोः=लोकवेदयोरुक्तमनतिक्रम्य वर्तमानं शास्त्रानुपूर्वं शास्त्रप्रवर्तकगुरुपरम्पराप्राप्तं विद्यात्=जानीयादिति ।

अत्र पूर्वार्धेन पाणिनीयशिक्षेति ग्रन्थनाम निर्दिशता आचार्येण विषयो निर्दिष्टः । शास्त्रानुपूर्वं तद्विद्यादित्यनेन ग्रन्थस्य प्रामाणिकत्वं ध्वनितम् । यथोक्तमित्यादिना लोकवेदविरुद्धत्वं निरस्तम् । न चान्यशिक्षासु विद्यमानासु पाणिनीयशिक्षाप्रणयनं व्यर्थमिति वाच्यम् ? अस्याः सर्ववेदोपकारकत्वात् । तदुक्तमभियुक्तैः—"काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्" इति ॥ १ ॥

ननु शिक्षाप्रणयनात्प्रागेव तत्तद्वर्णानां तत्तत्स्थानस्य ज्ञानं प्रेक्षावतामनुभवसिद्धमिति तैः शिक्षा न जिज्ञास्या, मन्दमतिभिरपि न जिज्ञास्या, अविदिते जिज्ञासानुदयात् । तदुक्तं शाङ्करभाष्ये—"प्रसिद्धं न जिज्ञासितव्यम् । अथाप्रसिद्धं नैव शक्यं जिज्ञासितुमिति" । एवञ्च जिज्ञासुविरहात् शिक्षाप्रणयनं व्यर्थमित्याकलय्य समाधातुकाम आह—

पाणिनीय मतके अनुसार शिक्षा नामक वेदाङ्गको कहूँगा । उसे लोक तथा वेदमें कहे हुए अनुसार तथा शास्त्रोंके प्रवर्त्तक गुरुओंकी परम्परासे प्राप्त समझें ॥ १ ॥

प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः ।
पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ॥ २ ॥

प्रसिद्धमिति ॥ शब्देभ्य इदं शब्दार्थं=शब्दजनकस्थानादिप्रसिद्धं, प्रेक्षावतामिति शेषः । अबुद्धिभिः=मन्दमतिभिरविज्ञातमपि=अविज्ञातञ्च । अपिश्चार्थः । एवञ्च शिक्षाप्रणयनं यद्यपि व्यर्थम्, तथापि वाचः=वर्णस्योच्चारणे विधिम्=उपायभूतं स्थानादि, पुनर्व्यक्तीकरिष्यामि=अनुवदिष्यामि, दार्ढ्यायेति शेषः ।

अयम्भावः—कण्ठ्यावहावित्यादिनाऽकारादीनां न कण्ठादिस्थानविधायकं, किन्त्वनुवादकम् । एवञ्च दार्ढ्यायानुवादकेऽपि प्रवृत्तिः प्रेक्षावतां भवत्येवेति शिक्षाप्रणयनं युक्तम् । तदुक्तं शेखरे–'तत्तद्वर्णोत्पत्तेः वाक् तत्तत्स्थानादौ जिह्वास्पर्शाद्यनुभवेन तत्तद्वर्णानां स्थानत्वनिर्णयेऽपि अकुहेत्यादिकथनं साधारणधर्मबोधनायानुवादकम्, नतु एतदेव कण्ठादिस्थानविधायकमिति भ्रमितव्यमि'ति ॥ २ ॥

शब्दोंके उत्पत्ति-स्थान आदि प्रसिद्ध होते हुए भी अल्पबुद्धिवालोंके लिए अज्ञात है, अतः पुनः वर्णोंके उच्चारण करनेकी विधिको कहूँगा। ॥ २ ॥

सम्प्रति येषां वर्णानां स्थानादिकथनं, यावन्तश्च ते इत्याह—

त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा ॥ ३ ॥

त्रिषष्टिरिति ॥ अत्र चापीति वाक्यालङ्कारे। प्राकृते=प्रकृत्यनुकूले मातृभाषाभूते संस्कृते=संस्कृतभाषायां स्वयम्भुवा=ब्रह्मणा स्वयं प्रोक्ता वर्णाः। शम्भुमते त्रिषष्टिः चतुःषष्टिर्वा मताः=इष्टा इति। अनेन संस्कृतमेव मातृभाषाभूतं व्यापकं पूर्वमासीदिति सूचितम्। प्राकृतादिभाषाणां संस्कृतादेवोत्पत्तिरिति च प्रकटीकृतम्। यद्वा प्राकृते=प्राकृतभाषोपादानभूते इत्यर्थः। प्राकृतपदं प्राकृतोपादाने लाक्षणिकमिति ॥ ३ ॥

प्रकृतिके अनुकूल संस्कृत भाषामें शम्भुके मतमें तिरसठ या चौसठ वर्ण होते हैं, ब्रह्माने भी स्वयं इसे कहा है ॥ ३ ॥

त्रिषष्टिरिति। ननु इदं न्यूनम्, ईषत्स्पृष्टयोर्ऋकारलृकारयोराधिक्यात्। एओङ्सूत्रस्थभाष्येण त्रिमात्रचतुर्मात्रा वा आदेशा माभूवन्नित्यनेन सूचितयोः त्रिमात्रचतुर्मात्रयोरेकारौकारयोराधिक्याच्चेति चेदत्र केचित्, भाष्यप्रामाण्यात्तेषामपि तत्र पूरणात्। अत एवाक्षरसमाम्नाये अविद्यमाना अपि यमाः भाष्यप्रामाण्यात् शिक्षाप्रामाण्याच्च वर्णराशिषु पूर्यन्ते इत्याहुः। परे तु त्रिषष्टिरित्यादिसंख्या न व्यक्तिकृता, वर्णानां प्रत्युच्चारणं भेदपक्षेऽसम्भवात्। किन्तु धर्मकृता। तथा चाऽभितोऽज्भक्तिसहितरेफघटितत्वतादृशलकारघटितत्वरूपधर्माभ्यां विवृतयोरीषत्स्पृष्टयोर्ऋलृवर्णयोर्द्वित्वमेव। एवं द्विमात्राधिकत्वेनानुगमेन त्रिमात्रचतुर्मात्रयोरपि प्लुतमध्येऽन्तर्भावान्नाधिक्यमित्याहुः, युक्तञ्चैतत्, अत एव उदात्तत्वादिधर्मभेदादधिका संख्या इत्यपि निरस्तम्। अत्र एकविंशतित्वविभाजको धर्मः—ह्रस्वतासमानाधिकरणत्वादिरूपः, दीर्घत्वसमानाधिकरणत्वादिरूपः, प्लुतत्वसमानाधिकरणत्वादिरूपः। दीर्घत्वसमानाधिकरणैत्वादिरूपः प्लुतत्वसमानाधिकरणैत्वादिरूपो बोध्यः। तेन न न्यूनत्वप्रसङ्गोऽपि इति ॥ ३ ॥

के च ते वर्णाः कथं च तेषां त्रिषष्टित्वं चतुःषष्टित्वं वेत्याह—

स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥ ४ ॥
अनुस्वारो विसर्गश्च ≍क≍पौ चापि पराश्रितौ ।
दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च ॥ ५ ॥

स्वरा इति ॥ एकविंशतिः स्वराः, पञ्चविंशतिः स्पर्शाः, अष्टौ यादयः–य व र ऌ श ष स हाः, चत्वारो यमाः वर्णेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये पूर्वसदृशा वर्णाः । अनुस्वारः, विसर्गः, पराश्रितौ = परसन्निधाने जायमानौ ≍क≍पौ, दुःस्पृष्टः द्वयोः स्वरयोर्मध्ये वर्तमानो लकार इति त्रिषष्टिर्वर्णा बोध्याः । प्लुतऌकारोऽपि पृथग्वर्ण इति मते चतुःषष्टिर्वर्णा बोध्याः । दुःस्पृष्ट-लकारश्च (लड विलासे) इति धातौ लडयोर्लरयोश्चैकत्वस्मरणादिति कौमुदी-ग्रन्थमुपादायोक्तं शेखरे—"एको दुःस्पृष्ट इति" अत एवात्र 'द्विस्पृष्ट' इति पाठोऽपपाठः । 'दुःस्पृष्ट' इति पाठः राघवेन्द्राचार्यसम्मतोऽपि । एतेन वर्णरत्न-दीपिकायाम्—"द्विःस्पृष्टता च विज्ञेया दधयोः स्वरमध्ययोः ॥" इति । श्लोके दुःस्पृष्टता इत्येव पाठः साधीयानिति । एकविंशतिस्वराश्च अ इ उ ऋ इत्येते ह्रस्वदीर्घप्लुतभेदाद् द्वादश, ए ओ ऐ औ इत्येते दीर्घप्लुतभेदात् अष्टौ ऌकारो ह्रस्व इत्येव, सङ्कलनया बोध्याः ॥ ४–५ ॥

एक्किस स्वर, पच्चीस स्पर्श, यादि आठ तथा चार यम कहे गये हैं, अनु-स्वार, विसर्ग, पराश्रित ≍क तथा ≍प, दुःस्पृष्ट, प्लुत ऌकार इस प्रकारसे जानना चाहिए ॥ ४-५ ॥

सम्प्रति वर्णोत्पत्तिं वर्णविभागञ्च निरूपयितुं प्रक्रमते—

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ ६ ॥

चत्वारश्च यमाः स्मृता इति । ननु वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे पूर्व-सदृशवर्णस्यैव यमत्वेन तेषां च विंशतित्वमिति कथं चतुष्ट्वमिति चेन्न, प्रथम-यमत्वादिना तेषां विभजनाच्चतुष्ट्वोपपत्तेः । परे तु कचटतपानां पञ्चमे परे मध्ये

आत्मेति ।। आत्मात्रान्तःकरणं स=आत्मा संस्काररूपेण अर्थान्=स्वगतान् घटपटादिपदार्थान् बुद्धचा स्ववृत्त्या समेत्य—एकबुद्धिविषयान् कृत्वा विवक्षया=स्वस्मिन् संस्काररूपेण स्थितपदार्थबोधनेच्छया मनः स्वस्यैव परिणामविशेषं युङ्क्ते=युक्तं करोति 'अत्र युजिरन्तर्भावितण्यर्थः'। मनः तथाविधमनः कायाग्निं जाठरमग्निमाहन्ति अभिहन्तीत्यर्थः। सः कायाग्निः मारुतम्=प्राणाख्यं वायुं प्रेरयतीत्यर्थः ।। ६ ।।

अन्तःकरण स्वगत पदार्थोंको अपनी वृत्तिसे एकबुद्धि-विषय बनाकर उन्हें जाननेकी इच्छासे मनको युक्त करता है, वही मन कायाग्निको आघात करता है, वही कायाग्नि प्राणवायुको प्रेरित करता है ।। ६ ।।

मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् ।
प्रातः सवनयोगं तं छन्दो गायत्रमाश्रितम् ।। ७ ।।

मारुत इति ।। मारुतः=कायाग्निप्रेरितः प्राणाख्यवायुरुरसि=हृद्देशे चरन्=भ्रमन् मन्द्रमल्पतरं तं=प्रसिद्धं स्वरं जनयति=उत्पादयति। कथंभूतं स्वरमित्याह—प्रातःसवनयोगं प्रातःसवनकर्मसाधनमन्त्रोपयोगिनं पुनः, छन्दो गायत्रमाश्रितं गायत्र्याख्यच्छन्दोयुक्तमित्यर्थः। तच्छब्दः प्रसिद्धार्थकः—'कला हि सा कान्तिमत इति' महाकविप्रयोगे प्रसिद्ध इति ।। ७ ।।

कायाग्निसे प्रेरित प्राणवायु हृदयमें भ्रमण करता हुआ उसी मन्द्र स्वरको उत्पन्न करता है, जो कि प्रातः सवनकर्मके साधनरूपी मन्त्रोंके उपयोगी तथा गायत्री नामक छन्दसे युक्त है ।। ७ ।।

एको यमः, द्वितीयानां पञ्चमे परे मध्ये एको यमः, तृतीयानां पञ्चमे परे मध्ये एको यमः, चतुर्थानां पञ्चमे परे मध्ये एको यमः, इति सङ्कलनया चतुष्ट्वं वास्तविकमेवेति वदन्ति। नचैवं 'खयां यमाः' इति बहुवचनप्रयोगोऽसङ्गतः स्यादिति वाच्यम्, व्यक्त्यभिप्रायेण तदुपपत्तेः। अत एव प्रथमतृतीययमौ इति द्विवचनं साधु सङ्गच्छते, तस्मात् चत्वार एव यमा इति। यमस्तु ककारादिसदृशः कश्चन वर्णविशेषः। तथा च राज्ञामित्यादौ श्चुत्वं न स्यात्, यमेन व्यवधानादिति वाच्यम्, "अशरीरं यमं प्राहुः" इत्यादिवचनेन यमस्याशरीरत्वे तैर्व्यवधानासम्भवादिति, पूर्वसदृश इत्यत्र सादृश्यं यत्नकृतं, नतु वर्णत्वकृतमिति ।। ४ ।।

कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् ।
तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥ ८ ॥

कण्ठ इति ॥ अत्र मारुत इति सम्बध्यते । तथाच मारुतः कण्ठे=कण्ठदेशे भ्रमन् त्रैष्टुभानुगं त्रैष्टुप्छन्दोयुक्तं माध्यन्दिनयुगं=माध्यन्दिनसवनकर्मसाधनमन्त्रोपयोगिनं मध्यमं=स्वरं शीर्षण्यं=शिरोगतो वायुः शीर्षण्यमिति । सामान्ये नपुंसकम् । जागतानुगं=जगतीछन्दोयुक्तं तार्तीयसवनं तृतीयमेव तार्तीयं तच्च तत्सवनं तार्तीयसवनं सायंसवनम् एतत्कर्मसाधनमन्त्रोपयोगिस्वरोऽपि लक्षणया सायंसवनपदबोध्यः, तेन तार्तीयसवनं सायंसवनकर्मसाधनमन्त्रोपयोगिनम् । तारं=उच्चैस्तरं स्वरञ्च जनयतीत्यर्थः । अत्रेदं बोध्यम्—पूर्वश्लोकेऽस्मिन् श्लोके च प्रातःसवनमाध्यन्दिनशब्दौ लक्षणया ज्योतिष्टोमादौ प्रसिद्धप्रातःसवनादिकर्मसाधनमन्त्रपराविति ॥ ८ ॥

प्राणवायु कण्ठ देशमें भ्रमण करता हुआ त्रैष्टुप्छन्दोयुक्त माध्यन्दिन सवनकर्मके साधनरूपी मन्त्रोंके उपयोगी मध्यम स्वर तथा शिरोदेशमें भ्रमण करता हुआ जगतीछन्दोयुक्त सायं सवनकर्मके साधनरूपी मन्त्रोंके उपयोगी तार-स्वरको उत्पन्न करता है ॥ ८ ॥

सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापाद्य मारुतः ।
वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ॥ ९ ॥

सोदीर्ण इति ॥ सोदीर्ण इत्यत्र 'सोऽचि लोप' इति सुलोपः । एवञ्च स मारुतः उदीर्णः ऊर्ध्वं प्रेरितः, मूर्ध्नि अभिहतः=अभिघाताख्यसंयोगाश्रयः सन् वक्त्रं कण्ठादिस्थानदेशमापद्य वर्णाञ्जनयते उत्पादयतीत्यर्थः । अयम्भावः, शब्दप्रयोगेच्छयोत्पन्नो यत्नो यस्मिन् तथाभूतमनोऽभिहताग्निना नाभिप्रदेशात् प्रेरितः प्राणाख्यवायुवेगान्मूर्धपर्यन्तं गत्वा निवृत्तो वक्त्रं प्राप्योक्तयत्नसहायेन तत्तत्स्थानेषु जिह्वाग्रादिस्पर्शपूर्वकतत्तत्स्थानान्याहत्य वर्णानभिव्यनक्तीति । स्पष्टञ्चेदं सर्वशेखरे । वर्णोत्पत्तिं निरूप्य वर्णभेदमाह—तेषामिति । तेषां=वर्णानां विभागः=भेदः पञ्चधा=पञ्चप्रकारेण स्मृतः कथित इत्यर्थः ॥ ९ ॥

प्राणवायु उदर्ध्व प्रेरित हो मूर्धामें आघात होकर वक्त्रादि स्थानको प्राप्त-

कर वर्णोंको उत्पन्न करता है। उनका पाँच प्रकारसे विभाग बताया गया है ॥ ९ ॥

पूर्वोक्तं पञ्चधा वर्णभेदं सम्प्रति निर्दिशति--

स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः ।
इति वर्णविदः प्राहुर्निपुणं तन्निबोधत ॥ १० ॥

स्वरत इति ॥ वर्णविदः=वर्णज्ञाः स्वरतः=स्वरेण कालतः=कालेन स्थानात्=स्थानेन प्रयत्नानुपदानतः=आभ्यन्तरबाह्यप्रयत्नाभ्यां वर्णभेदं प्राहुः=कथितवन्तः । तं निपुणं स्फुटतया अभिधीयमानं निबोधत=जानीत ॥ १० ॥

वर्णोंको जाननेवाले विद्वान् स्वर, काल, स्थान, आभ्यन्तर प्रयत्न तथा बाह्य प्रयत्नसे वर्णभेद कहते हैं, उसे स्पष्टतया जानें ॥ १० ॥

उद्दिष्टक्रमेण तान् दर्शयति--

उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ॥ ११ ॥

उदात्तत्वादिकृतस्वरभेदास्त्रयो ह्रस्वादिनियमाश्च कालतः=कालकृतः अचि=अज्विषये बोध्या इति । अचीति विषयसप्तमीति ॥ ११ ॥

उदात्त, अनुदात्त, स्वरित--ये तीन स्वरभेद तथा ह्रस्व, दीर्घ, प्लुत--ये तीन नियम कालभेद अच्-विषयमें होते हैं ॥ ११ ॥

निषादादिगान्धर्वशास्त्रप्रसिद्धसप्तस्वरभेदानुदात्तादिषु अन्तर्भावयति--

उदात्ते निषादगान्धारावनुदात्त ऋषभधैवतौ ।
स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः ॥ १२ ॥

उदात्त इति ॥ निगदव्याख्यातमिदम् इति ॥ १२ ॥

उदात्तमें निषाद-गान्धार, अनुदात्तमें ऋषभ-धैवत, स्वरितमें षड्ज-मध्यम-पञ्चम अन्तर्भूत हैं ॥ १२ ॥

क्रमप्राप्तं स्थानभेदमाह--

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च ॥ १३ ॥

अष्टाविति ।। अतिस्फुटार्थोऽयं श्लोकः । अत्र "नासिकोष्ठाविति" अपपाठः, असमासे पररूपस्याप्राप्तेः । समासे चैकवद्भावापत्तेरिति ।। १३ ।।

उरः, कण्ठ, शिरः, जिह्वामूल, दन्त, नासिका, ओष्ठ––ये आठ वर्णोंके उच्चारण-स्थान हैं ।। १३ ।।

ऊष्मणोऽष्टधा गतिमाह––

ओभावश्च विवृत्तिश्च शषसा रेफ एव च ।
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ।। १४ ।।

ओभाव इति ।। ऊष्मणः=विसर्गस्य ओभावः, विवृतिः, शषसाः, रेफः, जिह्वामूलमुपध्मेति अष्टधा गतिर्भवति, उदाहरणानि यथा––शिवो वन्द्यः, क ईशः, हरिश्शेते, आविष्कृतम्, कस्कः, अहर्पतिः, कः करोति, कः पचति इति । यत्र यद्येतेषां श्रवणं न स्यात् तर्हि सति सम्भवे विसर्गः श्रूयते । एतावतैव ऊष्मणां गत्यष्टककथनम् । विवृत्तिः सन्ध्यभावः । तदुक्तं याज्ञवल्क्यशिक्षायाम्–"द्वयोस्तु स्वरयोर्मध्ये सन्धिर्यत्र न दृश्यते । विवृतिस्तत्र विज्ञेया य ईशेति निदर्शनम्" ।। (श्लो० ९४) विसर्गस्योष्मसंज्ञा तु ऊष्मसु पाठेन तात्स्थ्यात् लक्षणया बोध्या, मञ्चाः क्रोशन्तीतिवत् । इदमप्रसङ्गादागतमिति केचित् । तन्न, पूर्वत्र अष्टाविति पदकथनेन अष्टपदघटितस्यास्यापि स्मृतिपथारूढत्वादिति ।। १४ ।।

ओ हो जाना, लोप होना, श-ष-स हो जाना, रेफ होना, जिह्वामूल होना, उपध्मानी होना––ये विसर्ग की आठ गति हैं ।। १४ ।।

उक्ते किञ्चिद् विशेषमाह––

यद्योभावप्रसन्धानमुकारादिपरं पदम् ।
स्वरान्तं तादृशं विद्याद् यदन्यद् व्यक्तमूष्मणः ।। १५ ।।

यदीति ।। अत्र यत्र तत्रेति पदद्वयाध्याहारः । यत्र यस्मिन्पदे उकार आदिर्यस्य तत्तादृशं पदं परम्, तत्र यदि ओभावप्रसन्धानम् ओकारपरिज्ञानञ्चेत् तर्हि तादृशमोकारं स्वरान्तं=स्वरस्थानिकं विद्यात् । अन्यद् यदोकारप्रसन्धानं तदुष्मणो विसर्गस्य स्थाने व्यक्तं=परिस्फुटं विद्यात् । इदं व्याकरणान्तररीत्या बोध्यम्, विसर्गबोधकोष्मपदं रेफपरं वा बोध्यम् ।। १५ ।।

उकारादि पद यदि परमें हो, तथा उससे पूर्व ओकार प्राप्त हुआ है तो उस पूर्वपदको स्वरान्त जानें, उससे विपरीत यदि उकारादि पद परे न हो किन्तु उससे पूर्वपदको ओकार प्राप्त हुआ है तो उस ओकारको विसर्गका ओकार जानें ॥ १५ ॥

अष्टौ स्थानानि वर्णानामित्युक्तं तत्र कस्य किं स्थानमित्याह—

हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्।
उरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम् ॥ १६ ॥

हकारमिति ॥ पञ्चमैर्ङकारादिभिर्युक्तम् अन्तःस्थाभिः संयुतं च हकारमुरस्यं विजानीयात्। एतादृशहकारस्योरःस्थानमिति यावत्। असंयुतं हकारं कण्ठ्यमाहुः। तत्रोदाहरणं 'ह्मलयति, ह्वलयति' इति ॥ १६ ॥

वर्गके पञ्चम वर्ण तथा अन्तःस्थ वर्णसे संयुक्त हकारको उरःस्थानीय तथा असंयुक्त हकारको कण्ठस्थानीय कहा गया है ॥ १६ ॥

सम्प्रति सवर्णसंज्ञोपयोगिस्थानं दर्शयति—

कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू।
स्युर्मूर्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः ॥ १७ ॥

कण्ठ्येति ॥ अहौ=अकारहकारौ कण्ठ्यौ=कण्ठस्थानजातौ इचुयशास्तालव्याः=तालुस्थानजाता बोध्याः। उपू=उकारपवर्गौ ओष्ठजौ=ओष्ठस्थानजातौ बोध्यौ। ऋटुरषाः मूर्धन्याः स्युः। लृतुलसाः दन्त्याः=दन्तस्थानजाता बोध्याः। अत्र दन्तपदं दन्तसंयुक्तदेशपरं तेन भग्नदन्तस्याप्युच्चारणं भवत्येवेति ॥ १७ ॥

'अ-ह' का कण्ठ, 'इ-चवर्ग-य-श' का तालु, 'उ-पवर्ग' का ओष्ठ, 'ऋ-टवर्ग-र-ष' का मूर्धा, 'लृ-तवर्ग-ल-स' का दन्त उच्चारण-स्थान कहे गये हैं ॥ १७ ॥

जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः।
एऐ तु कण्ठतालव्या ओऔ कण्ठोष्ठजौ स्मृतौ ॥ १८ ॥

दन्त्योष्ठ्यो वः स्मृतो बुधैरिति। वकारो दन्तस्थानजन्य ओष्ठस्थानजन्यश्च। यत्तु वकारस्य समुदितं दन्तोष्ठस्थानमिति। तन्न, समुदितस्य स्थानत्वाभावात्। अत एव अष्टौ स्थानानीत्युक्तम्। नच कथं प्रत्येकं स्थानत्वं तज्जनकवाय्वाधार-

जिह्वामूल इति ॥ कुः जिह्वामूले प्रोक्तः, कवर्गस्य जिह्वामूलं स्थानम्। वः=वकारो बुधैर्दन्त्योष्ठ्यः स्मृतः। एऐ=एकारैकारौ कण्ठतालव्यौ ज्ञेयौ। ओऔ=ओकारौकारौ कण्ठोष्ठजौ स्मृताविति। नन्वत्र कवर्गस्य जिह्वामूलस्थानकथनेन कवर्गस्य कण्ठस्थानकथनं 'अकुहविसर्जनीयानां कण्ठः' इत्यादिना कौमुदीकृतामसङ्गतमिति चेन्न, कौमुदीग्रन्थे कण्ठपदस्य कण्ठस्थानतत्समीपजिह्वामूलस्थानोभयपरत्वात्। नच कवर्गस्यापि जिह्वामूलीयत्वे व्यवहारातिप्रसङ्ग इति वाच्यम्, जिह्वामूलीयपदस्य वर्णविशेषे रूढिस्वीकारादिति ॥ १८ ॥

विद्वानोंने 'कवर्ग'का जिह्वामूल, 'व'का दन्तोष्ठ, 'ए-ऐ'का कण्ठतालु, 'ओ-औ'का कण्ठोष्ठ उच्चारण-स्थान कहा है ॥ १८ ॥

नन्वेकारैकारयोः कण्ठ्यतालव्यत्वात्, ओकारौकारयोः कण्ठौष्ठजत्वात् "एचोऽयवायावः" इति सूत्रे 'स्थानेऽन्तरतम' इति सूत्रेण व्यवस्था न स्यादित्येकारादीनां स्थानकथनमसङ्गतमित्याक्षेपसङ्गत्याऽऽह—

अर्धमात्रा तु कण्ठ्यस्य एकारैकारयोर्भवेत्।
ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् ॥ १९ ॥
संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम्।

अर्धमात्रेति ॥ एकारैकारयोः ओकारौकारयोः, कण्ठ्यस्यार्धमात्रा मात्रा वा भवेत्, तु चात्र वार्थे, तयोरेङैचोः कण्ठ्यस्य विवृतसंवृतं संवृतविवृतप्रयत्नजन्यत्वं बोध्यम्। अथ तच्छब्दो बुद्धिस्थपरामर्शकस्तेन एङैचोः परामर्शः। विवृतसंवृतमिति

त्वमेव तत्स्थानत्वं वाच्यम्, तथा चैकत्र वाय्वाघातेनैव वकारस्याऽभिव्यक्त्याऽपरस्य स्थानत्वाभावप्रसंगात्। इति चेदत्रोच्यते, वकारे पादमात्रिकं भागद्वयं स्वीक्रियते। एवञ्च दन्ते वाय्वाघातेनैकभागः, अपरभागश्च ओष्ठे वाय्वाघातेनाऽभिव्यज्यते इति द्वयोर्वकारस्थानत्वमुपपद्यते, इति। नच भिन्नभिन्नस्थानजन्यत्वस्यैव वर्णभेदव्यपदेशनियामकत्वेन भिन्नवर्णत्वव्यपदेशापत्तिरिति वाच्यम्, भेदाधिष्ठानं वर्णद्वयोत्पत्त्यधिकरणक्षणयोरुत्पत्त्यनधिकरणव्यवधानस्यैव वर्णभेदे व्यपदेशनियामकत्वेन प्रकृते भागद्वयोत्पत्त्यधिकरणक्षणयोरुत्पत्त्यनधिकरणक्षणव्यवधानशून्यत्वेन भिन्नवर्णत्वव्यपदेशानापत्तेरिति। एवमेकारैकारयोः ओकारौकारयोर्भागद्वयकृतं स्थानद्वयं बोध्यमिति दिक् ॥ १८ ॥

भावप्रधाननिर्देशः। संवृतञ्च विवृतञ्चेति विग्रहे द्वन्द्वसमासे लघ्वक्षरत्वाद्विवृतस्य पूर्वप्रयोग इत्यवधेयम्। मात्रिकं संवृतं ज्ञेयं द्विमात्रिकं तु विवृतमिति कारिकार्थः। एवञ्चायादिषु मात्रिकः संवृतः, द्विमात्रिको विवृतः। एकारैकारयोः कण्ठ्यः संवृतः। ऐकारौकारयोस्तु कण्ठ्यो विवृतस्तेन संवृतावर्णघटिततालुस्थानजन्यघटितस्य तादृशौष्ठस्थानघटितस्य च स्थाने संवृतावर्णघटिततालुस्थानजन्यघटितायादेशः। अन्यस्य च संवृतावर्णघटितोष्ठस्थानजन्यघटितावादेशो भवति। एवं विवृतावर्णघटितस्य विवृतावर्णघटित इति नाव्यवस्था। तस्मात् 'ए ऐ तु कण्ठ्यतालव्यौ' इति युक्तमुक्तमित्यर्थो मह्यं रोचते। अन्यस्तु अन्यतो बोध्य इति ॥ १९½ ॥

'ए-ऐ'में अर्ध मात्रा तथा 'ओ-औ'में एक मात्रा कण्ठकी होती है। उनके भी विवृत तथा संवृत प्रयत्न होते हैं, संवृतकी एकमात्रा तथा विवृतकी दो मात्रा जानें ॥ १९½ ॥

प्रसङ्गतोऽन्यवर्णानामपि विवृतत्वादिकं दर्शयति—

घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः ॥ २० ॥
स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम्।
तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥ २१ ॥

घोषा वेति ॥ वेति पादपूरणे। "वा स्याद्विकल्पोपमयोर्वितर्के पादपूरणे" इति मेदिनीकोषात्। तथा च सर्वे घोषाः संवृताः संवारप्रयत्ना बोध्याः। अघोषा विवृताः विवृतप्रयत्नाः स्मृताः=कथिता इत्यर्थः। स्वराणामूष्मणां=शषसहानां विवृतं करणं स्मृतम्, एषां विवृतप्रयत्नो बोध्यः। एङौ=एकारौकारौ तेभ्योऽपि स्वरोष्मभ्योऽपि विवृतौ=विवृततरौ। ऐचौ=ऐकारौकारौ ताभ्यामेकारौकाराभ्याञ्च तथैव विवृतौ=विवृततमौ इति कारिकार्थः। एवञ्चैकारस्य ऐकारस्य च परस्परं सवर्णसंज्ञापि न, प्रयत्नभेदादिति। नैकारेण ऐकारग्रहणप्रयुक्तो दोषश्च। नन्वेकारादिषु पूर्वं संवृतत्वादेरपि कथनात्कथं तेषां विवृततरत्वादिकथनमिति चेन्न, इतरांशे एव विवृततरत्वाद्यभिधानात्। तदुपरागाच्च न संवृतत्वस्य पृथग्ग्रहणमिति स्पष्टं शेखरे ॥ २०–२१ ॥

सभी घोष संवृत तथा सभी अघोष विवृत होते हैं। स्वर तथा उष्म वर्ण-

का प्रयत्न विवृत है। उनमेंसे भी 'एङ्' विवृततर तथा 'ऐच्' विवृततम है। ॥ २०-२१ ॥

सिंहावलोकनन्यायेन पुनरपि स्थानं निरूपयति--

अनुस्वारयमानाञ्च नासिकास्थानमुच्यते।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः॥ २२॥

अनुस्वारेति॥ अनुस्वारयमानाम्=अनुस्वारस्य यमानाञ्च, स्थानं नासिकोच्यते। अयोगवाहा भाष्यपरिगणिता अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमा आश्रयस्थानभागिनः, यत्स्वराश्रितः तस्य तत्स्थानं तत्स्थानका विज्ञेयाः। यथा 'रामः' इत्यत्र विसर्गस्य कण्ठस्थानम्। 'हरिः' इत्यत्र विसर्गस्य तालुस्थानमिति। अत्र च-शब्देन ञमङणनानामपि संग्रहस्तेन तेषामपि नासिकास्थानमित्यपि बोध्यम्। वाहयन्ति कार्यं निर्वाहयन्तीति वाहाः, न योगो वर्णसमाम्नायेषु पाठो येषां ते अयोगास्ते च ते वाहा अयोगवाहाः। अत्रानुस्वारयमानां पृथक् नासिकास्थानकथनेन ते नाश्रयस्थानभागिनः, किन्तु तदन्यविसर्गादिरेवेति न भ्रमितव्यम्, आश्रयस्थानापरित्यागेन नासिकास्थानकथनात्। अत एव ञादीनां नासिकास्थानत्वेऽपि तात्वादिस्थानत्वमपि सर्वसम्मतम्। अनुस्वारोऽपि आश्रयस्थानभागीति मत्वैव शब्दरत्नकृता 'हरिं जयति' इत्यत्रापादितो जश्, जकारः स्यादित्युक्तं भावप्रकाशकृता॥ २२॥

अनुस्वार तथा यम वर्णोंका स्थान नासिका है। अयोगवाहोंका स्थान उनके आश्रय-वर्णके स्थान होता है॥ २२॥

हकारादिपरानुस्वारोच्चारणविधिमाह--

अलाबुवीणानिर्घोषो दन्तमूल्यः स्वरानुगः।
अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च॥ २३॥

अलाब्विति॥ अलाबुनः=तुम्बीफलस्य या वीणा तस्याः निर्घोष इव निर्घोषो यस्य स अलाबुवीणानिर्घोषः दन्तमूल्यः=दन्तमूले भवः स्वरानुगः=स्वरान् अनुगच्छतीति स्वरानुगोऽचः पर इति यावत्। ईदृशोऽनुस्वारः ह्रोः=हकाररेफयोः परयोः शषसेषु च परेषु नित्यं कर्तव्यः, उच्चारयितव्य इत्यर्थः। उदाहरणं यथा—बृंहणम्, कुण्डं रथेन, कंसः, इन्द्रियाणां षष्ठं मनः, हंस इति॥ २३॥

तुम्बी-फल या वीणा के समान निर्घोषवाले, दन्तमूलमें उत्पन्न होनेवाले, स्वरके बादके अनुस्वारका ह, रेफ अथवा श-ष-स उसके बादमें हों तो नित्य उच्चारण होता है ॥ २३ ॥

पुनरनुस्वारादेरुच्चारणविधिं दर्शयति—

अनुस्वारे विवृत्यां तु विरामे चाक्षरद्वये ।
द्विरोष्ठ्यौ तु विगृह्णीयाद्यत्रौकारवकारयोः ॥ २४ ॥

अनुस्वार इति ॥ अनुस्वारे विवृत्यां विरामे=वर्णानामुच्चारणाभावे अक्षरद्वये=संयुक्तवर्णद्वये च उच्चारयितव्ये यत्र यत्पदघटकयोरोकारवकारयोः उच्चारयितव्ययोः ओष्ठ्यौ=ओष्ठ्यौ द्विर्विगृह्णीयादिति । ओष्ठ्यावित्यत्र स्वार्थिकः ष्यङ् । विवृतिर्विवेकेन पृथक् भावेन वर्तत इति विवृतिः । सा च चतुर्विधा, तथा च नारदः—विवृतयश्चतस्रो वा विज्ञेया इति मे मतम् । अक्षराणि नियोगेन तासां नामानि मे शृणु । ह्रस्वादिर्वत्सानुसृता वत्सानुसारणी चाग्रे । पाकवत्युभयोर्ह्रस्वा दीर्घवत्ता पिपीलिका ॥ २४ ॥

अनुस्वार विवृत्ति, विराम तथा संयुक्त वर्ण-द्वयके उच्चारणमें, जो पद घटक ओकार तथा वकारके उच्चारणमें ओष्ठ्य-दो पृथक् करें ॥ २४ ॥

सर्ववर्णोच्चारणविधिं सदृष्टान्तमाह—

व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत् ।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ॥ २५ ॥

व्याघ्रीति ॥ यथा व्याघ्री=व्याघ्रपत्नी मार्जारी वा पतनभेदाभ्यां भीता सती दंष्ट्राभ्यां पुत्रान्हरेत्=नयेत् पीडयेच्च न, तद्वद्वर्णान् अक्षराणि प्रयोजयेत्= उच्चारयेत्, उच्चारयितेति शेषः । वर्णोच्चारणकाले उच्चारयित्रा सावधानेन भवितव्यमिति भावः ॥ २५ ॥

जिस प्रकार बाघिन गिरनेके तथा छेद हो जानेके भयसे भयभीत हो दाँतोंसे बच्चोंको ले जाती है, पीड़ा नहीं देती है, उसी प्रकार वर्णोंके उच्चारणमें भी न अधिक शिथिल हो या न अतीव आघात हो ॥ २५ ॥

रङ्गवर्णः कथमुच्चारयितव्यस्तत्राह--

यथा सौराष्ट्रिका नारी तक्रँ इत्यभिभाषते ।
एवं रङ्गाः प्रयोक्तव्याः खेअराँ इव खेदया ।। २६ ।।

यथेति ।। यथा सौराष्ट्रिका=सुराष्ट्रदेशजाता नारी=कामिनी तक्रँ इत्यभिभाषते=निरनुनासिकमपि शब्दं सानुनासिकं वक्ति । एवं रङ्गाः प्रयोक्तव्याः= उच्चारयितव्याः । तत्रोदाहरणमाह–'खेअराँ' इति इदं वेदवाक्यम् । नकारे रुत्वे जाते योऽनुनासिको विधीयते स रङ्गः । रञ्जयति पूर्ववर्णमिति रङ्गो वर्णविशेषः । बाहुलकत्वात्कर्तरि घञ् । करणे घञ् तु न युक्तः, घञि चेत्यादिना नलोपापत्तेः । यथाह नारदः–नकारः स्वरसंयुक्तश्चतुर्युक्तो विधीयते । रेफो रङ्गश्च लोपश्च अनुस्वारोऽपि वा क्वचित् ।। इति । लोमशशिक्षायां (श्लो० ७) तु रङ्गस्य द्वैविध्यमप्युक्तम्–'रङ्गस्तु द्विविधो ज्ञेयः, स्वरपरो व्यञ्जनपरः' इति ।। २६ ।।

जिस प्रकार सुराष्ट्र देशकी नारी तक्रँ इस प्रकार कहती है इसी प्रकार रङ्गका उच्चारण करना चाहिए, जैसे कि वेदमें खेअराँ शब्दका उच्चारण होता है ।। २६ ।।

पुनरपि रङ्गोच्चारणविधिं चतुर्भिश्श्लोकैर्दर्शयति--

रङ्गवर्णं प्रयुञ्जीरन् नो ग्रसेत्पूर्वमक्षरम् ।
दीर्घस्वरं प्रयुञ्जीयात्पश्चान्नासिक्यमाचरेत् ।। २७ ।।

रङ्गेति ।। पूर्वमक्षरम्=पूर्वो वर्णः रङ्गवर्णं यथा नो ग्रसेत्=पूर्ववर्णरङ्गवर्णयोः सम्मेलनं यथा न भवेत् तथा प्रयुञ्जीरन् उच्चारयेयुः । तथा रङ्गं दीर्घस्वरं प्रयुञ्जीयात् । पश्चात् रङ्गस्यान्ते नासिक्यमाचरेत्=उच्चारयेत् । एतच्च याज्ञवल्क्यशिक्षायामपि (श्लो० १२८) उक्तम् । यथा च--रङ्गे चैव समुत्पन्ने न ग्राह्यं पूर्वमक्षरम् । स्वरं दीर्घं प्रयुञ्जीत पश्चान्नासिक्यमाचरेत् ।। २७ ।।

पूर्ववर्ण तथा रङ्गवर्णका जिस प्रकार सम्मेलन न हो सके उसी प्रकार उच्चारण करे । रङ्गका दीर्घस्वर उच्चारण करे । रङ्गके अन्तमें अनुनासिकका उच्चारण करे ।। २७ ।।

हृदये चैकमात्रस्त्वर्द्धमात्रस्तु मूर्द्धनि ।
नासिकायां तथार्द्धं च रङ्गस्यैवं द्विमात्रता ।। २८ ।।

हृदय इति ॥ अतिस्फुटार्थोऽयम् । प्रक्षिप्तश्च प्रतिभाति । उदाहरणघटितश्लोकद्वयमध्येऽस्य पाठादिति ॥ २८ ॥

हृदयमें एक मात्रा, मूर्धामें अर्द्धमात्रा तथा नासिकामें अर्द्धमात्रा इस प्रकार रङ्गकी दो मात्राएँ हैं ॥ २८ ॥

हृदयादुत्करे तिष्ठन्कांस्येन समनुस्वरन् ।
मार्दवं च द्विमात्रं च जघन्वाँ२ इति निदर्शनम् ॥ २९ ॥

हृदयादिति ॥ हृदयात्=हृदयदेशात् उत्करे=ऊर्ध्वदेशे तिष्ठन् उच्चारितो रङ्गः कांस्येन=काँस्यपात्रस्वरेण समनुस्वरन्, मार्दवं=मृदुत्वम् द्विमात्रम्=द्विमात्रत्वञ्च प्राप्नुवन्, उच्चार्य इति शेषः । तत्र दृष्टान्तमाह–जघन्वाँ[२] इति । निदर्शनम्=दृष्टान्त इति बोध्यम् । अत्र काँस्येन समनुस्वरन्नित्यत्र समश्चासावनुस्वरन् समनुस्वरन्निति समासः सापेक्षत्वेऽपि आर्षत्वाद्बोध्यः । शकन्ध्वादित्वाच्च पररूपं ज्ञेयम् । द्विमात्रमिति च भावप्रधाननिर्देशः, तेन द्विमात्रमित्यस्य द्विमात्रत्वमित्यर्थो बोध्य इति ॥ २९ ॥

हृदयदेशके ऊर्ध्व-देशमें उच्चारित रङ्गका काँस्य पात्रके स्वरके समान मृदुत्व दो मात्रिक उच्चारण करे, जैसे 'जघन्वाँ २' यह उदाहरण है ॥ २९ ॥

एवं रङ्गोच्चारणविधिं निरूपयन् तदीयस्वरोच्चारणविधिमप्याह—

मध्ये तु कम्पयेत्कम्पमुभौ पार्श्वौ समौ भवेत् ।
सरङ्गं कम्पयेत् कम्पं रथीवेति निदर्शनम् ॥ ३० ॥

मध्ये त्विति ॥ अत्रोच्चारयित्रेति कर्तृपदमध्याहार्यम् । मध्ये=स्वरोच्चारणमध्यसमये कम्पं स्वरं कम्पयेत्=कम्पयुक्तमुच्चारयेत् । उभौ पार्श्वौ=स्वरारम्भावसानांशौ समौ भवेत्=भावयेत् । अन्तर्भावितण्यर्थश्चात्र भवति । कम्पम्=स्वरं सरङ्गम्=रङ्गेन सहितं तु कम्पयेत् । अत्र तु-शब्द एवार्थे । तेन सरङ्गमेव कम्पयेत्, नतु रङ्गरहितमित्यर्थः । तत्र दृष्टान्तमाह—रथीवेति । एतत्सर्वं लोमशशिक्षायामुक्तम्—केन कम्पातितः कम्पः संयोगो येन कम्पते । किंवा कम्प इति प्रोक्तो येनासौ कम्पमुच्यते ॥ पूर्वाङ्गणहतं पूर्वं पराङ्गेण तु धारितम् । व्यञ्जनेन द्विधा भिन्नः स्वरो भीतस्तु कम्पते ॥ (श्लो० ३–४) ॥ ३० ॥

स्वरोच्चारणके मध्यमें कम्प स्वरका कम्प युक्त-उच्चारण करे, स्वरके आरम्भ तथा अवसानमें समान रहे। कम्पस्वरका रङ्गके साथ उच्चारण करे। जैसे—'रथीव' उदाहरण है ॥ ३० ॥

एवं रङ्गवर्णोच्चारणविधिं तत्फलञ्च निरूपयन्नाह—

एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः।
सम्यग् वर्णप्रयोगेण ब्रह्मलोके महीयते ॥ ३१ ॥

एवमिति ॥ एवं पूर्वोक्तक्रमेण वर्णाः प्रायोक्तव्याः=उच्चारयितव्या अव्यक्ताः=स्पष्टतारहिताः पीडिताश्च नोच्चार्याः। सम्यग्वर्णप्रयोगेण=वर्णोच्चारणेन उच्चारयिता ब्रह्मलोके महीयते=पूज्यत इति। एतच्च याज्ञवल्क्येनाप्युक्तम्—मधुरं चापि नाव्यक्तं सुव्यक्तं न च पीडितम् ॥ इति ॥ मूलश्लोके नञ्द्वयं निषेधदाढर्याय बोध्यमिति ॥ ३१ ॥

इस प्रकार पूर्वोक्त विधिसे वर्णोंका उच्चारण करना चाहिए, अस्पष्ट तथा पीड़ित उच्चारण नहीं करना चाहिए। सम्यक् रूपसे वर्णोच्चारण करनेसे उच्चारण करनेवाला ब्रह्मलोकमें पूजित होता है ॥ ३१ ॥

अधमपाठकानाह—

गीति शीघ्री शिरःकम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥ ३२ ॥

गीतीति ॥ एते षट् पाठकाधमाः=पाठकेष्वधमा अधमाश्च ते पाठका इति वा समासः। के च ते तानाह—गीतीत्यादि। यः गानं कुर्वन् पठति, सः अधमः, एवं यः शीघ्रं पठति, यच्छिरः कम्पयन् पठति, यश्च लिखितपाठकः स्वलिखितं स्तोत्रं पठति, यश्चानर्थज्ञः=अर्थज्ञानशून्यः अल्पकण्ठश्च अनभ्यस्तपाठ एतेऽधमाः। अत्रालिखितपाठक इति छेदं बहवः कुर्वन्ति तत्तु कण्ठपाठनिषेधेन पुस्तकं निरीक्ष्यैव पाठः कार्य इत्यभिप्रायेण एष एव चोपासकानां सम्प्रदायः ॥ ३२ ॥

गाते हुए पढ़नेवाला, शीघ्र पढ़नेवाला, शिर हिलाते हुए पढ़नेवाला, स्वलिखित स्तोत्र पढ़नेवाला, अर्थको बिना जाने पढ़नेवाला, अल्प पाठका कण्ठस्थ करनेवाला ये छह पाठक अधम हैं ॥ ३२ ॥

सम्प्रति पाठकगुणानाह—

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥ ३३ ॥

माधुर्यमिति ॥ माधुर्यं=सुश्राव्यम् अक्षरव्यक्तिः=स्पष्टाक्षरोच्चारणं, पदच्छेदः=पदानां विभागः, सुस्वरः=शोभनस्वरः धैर्यम्=सुन्दरत्वं लयसमर्थम् एते षट् पाठकाः, पाठकस्येमे पाठकाः पाठकसम्बन्धिनो गुणा इति । इदं च प्रक्षिप्तं भाति, एवं वर्णा इत्यनेन पुनरुक्तत्वादिति ॥ ३३ ॥

मधुरत्व, स्पष्ट अक्षरोंका उच्चारण, पदोंका विभाग, सुस्वर, सुन्दर, लययुक्त ये छह पाठकके गुण हैं ॥ ३३ ॥

द्वाभ्यां निषेधविधिमाह—

शङ्कितं भीतिमुद्घुष्टमव्यक्तमनुनासिकम् ।
काकस्वरं शिरसिगं तथा स्थानविवर्जितम् ॥ ३४ ॥

शङ्कितमिति ॥ शङ्कितम्=संदिग्धं भीतिम्=भययुक्तम् उद्घुष्टं=प्रकृष्टध्वनियुक्तम् अव्यक्तम्=अस्पष्टम् अनुनासिकं=निरनुनासिकमपि अनुनासिकं काकस्वरं काकस्वरमिव काकस्वरम्=परुषं शिरसिगम्=शिरसोच्चारणं स्थानवर्जितम्=स्वाभाविकस्थानरहितं न वदेदित्युत्तरेण सम्बन्ध इति ॥ ३४ ॥

शङ्कायुक्त, भययुक्त, उच्चध्वनियुक्त, अस्पष्ट, अनुनासिक, कर्कश, शिरोयुक्त, स्वाभाविक स्थानरहित वर्णोच्चारण न करें ॥ ३४ ॥

उपांशुदष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम् ।
निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दानं न तु सानुनास्यम् ॥ ३५ ॥

उपांश्विति ॥ उपांशुदष्टम्=अंतर्मुखम् घुष्टमिव त्वरितम्=शीघ्रं निरस्तम्=निष्ठुरं विलम्बितम्=विलम्बकालेनोच्चारितं गद्गदितं=स्वरविशेषेणोच्चारितं प्रगीतं निष्पीडितम्=निष्पीडयोच्चारितं ग्रस्तपदाक्षरम्=ग्रस्तानि पदाक्षराणि यत्र तत् वर्णरहितं दीनम्=अनुत्साहेनोच्चारितं सानुनास्यं न वदेदिति । अत्र बहूनां पुनः पाठनिषेधो दाढर्यायेति बोध्यम् ॥ ३५ ॥

मुखके भीतर शब्दरहित, दन्त-पीड़ित, शीघ्र, निष्ठुर, विलम्बित, गद्गद स्वरसे, गीत गानके समान, पीड़ित, शब्दके कुछ वर्ण उच्चारण-रहित, अनुत्साहपूर्वक, नाकसे वर्णोच्चारण न करें ॥ ३५ ॥

सम्प्रति प्रातरादिकालत्रये वर्णोच्चारणविधिं द्वाभ्यामाह—

प्रातः पठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन ।
मध्यंदिने कण्ठगतेन चैव चक्राह्वसंकूजितसन्निभेन ॥ ३६ ॥

प्रातरिति ॥ प्रातः उरःस्थितेन शार्दूलरुतोपमेन=व्याघ्रध्वनिवद्गम्भीरेण स्वरेण । मध्यंदिने=दिनमध्ये चक्राह्वसंकूजितसन्निभेन कण्ठगतेन एवं स्वरेण वर्णान् पठेत् ॥ ३६ ॥

प्रातःकालमें उरःस्थित बाघके समान गम्भीर स्वरसे तथा माध्यन्दिनमें कण्ठस्थित चकोरके ध्वनिके समान वर्णोंका पाठ करें ॥ ३६ ॥

तारं तु विद्यात् सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम् ।
मयूरहंसान्यभृतस्वराणां तुल्येन नादेन शिरःस्थितेन ॥ ३७ ॥

तारमिति ॥ अत्र सवनशब्दः सायंकालपरः तथा च तृतीयं सवनं सायं तत्र तारम्=उच्चैस्तरं मयूरहंसन्यभृतस्वराणां=मयूरहंसकोकिलस्वराणाम् शिरः-स्थितेन नादेन तुल्येन स्वरेण पठेत् । तच्च शिरोगतं सदा प्रयोज्यं विद्यात् । अत्राम्बुभृत इत्यपि पाठः, मेघ इति च तदर्थं इति ॥ ३७ ॥

सायंकालका तार स्वर जानें । वह सदा शिरोगत प्रयोज्य है । इस समय मयूर, हंस तथा कोयलोंके स्वरोंके समान शिरःस्थित नादके समान स्वरसे पाठ करें ॥ ३७ ॥

इदानीमवसरसंगत्या वर्णानामाभ्यन्तरप्रयत्नं बाह्यप्रयत्नं च निरूपयन्नाह—

अचोऽस्पृष्टाः यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः ।
शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ॥ ३८ ॥

अचोऽस्पृष्टा इति । ननु स्वराणामित्यनेनाचो विवृतप्रयत्नस्योक्तत्वात् । पुनरचोऽस्पृष्टा इत्यनेन विवृतप्रयत्नकथनमसंगतमिति चेन्न, ताभ्यामैचावित्यनेन विवृततमत्वस्योक्ततया यणस्त्वीषदित्यत्र तस्यैव सम्बन्धापत्तेरिति बोध्यम् ॥ ३८ ॥

अच इति ।। अचः=स्वरा अस्पृष्टाः=स्पर्शाभावरूपविवृतत्ववन्तः, यण ईषत् =ईषत्स्पृष्टत्वम् ईषद्विवृतत्वं च बोध्यम् । शलः नेमस्पृष्टाः स्मृताः, नेम इत्यर्धे । तेन शलाम् ईषद्विवृतत्वं यणपेक्षयाधिकविवृतत्वञ्चेति बोध्यम् । शेषाः हलः स्पृष्टाः प्रोक्ता इति । आभ्यन्तरप्रयत्नं निरूप्य बाह्यप्रयत्नं निरूपयितुमाह— निबोधेति ।। अनुप्रदानतः=बाह्यप्रयत्नात् निबोध=वर्णभेदं जानीहीत्यर्थः ।। ३८ ।।

अच्का आभ्यन्तर प्रयत्न अस्पृष्ट=विवृत; यण्का ईषत्स्पृष्ट तथा ईषद्-विवृत; शल्का अर्धस्पृष्ट=ईषद्विवृत अर्थात् यण् की अपेक्षा अधिक विवृत है; शेष हल् स्पृष्ट कहे गये हैं । अब बाह्य प्रयत्नके भेदसे वर्णभेद जानें ।। ३८ ।।

सम्प्रति बाह्यप्रयत्नानाह—

ञमोऽनुनासिका न ह्रौ नादिनो हझषः स्मृताः ।
ईषान्नादा यणो जशः श्वासिनस्तु खफादयः ।। ३९ ।।

ञम इति ।। ञमः=अनुनासिकाः । ह्रौ=हकाररेफौ नानुनासिकौ इति वचनविपरिणामेनान्वयः । हझषः नादिनः स्मृताः । नादेति संवारघोषयोरप्युपलक्षणम् । यणः, जशः ईषन्नादाः खफादयः श्वासिनः=श्वासप्रयत्नवन्तः । अत्र यणो जश इत्यस्य स्थाने यणञ्चैवेति पाठः ।। ३९ ।।

ञम् अनुनासिक, हकार तथा रेफ अनुनासिकसे रहित; ह, झष्का नाद बाह्य प्रयत्न कहा गया है । यण् तथा जश् ईषन्नाद हैं, खफादय श्वास प्रयत्न-वाले हैं ।। ३९ ।।

ईषच्छ्वासांश्चरो विद्याद्गोर्धामैतत्प्रचक्षते ।
दाक्षीपुत्रपाणिनिना येनेदं व्यापितं भुवि ।। ४० ।।

ईषदिति ।। चरः ईषच्छ्वासान् विद्यात् । इत्थं वर्णभेदं निरूप्य पणिनीय-शास्त्रस्य माहात्म्यं दर्शयति—गोरिति । विद्वांस एतच्छास्त्रं गोर्वाचः धाम=स्थानं प्रचक्षते=कथयन्ति । येन दाक्षीपुत्रपाणिनिना इदं शास्त्रं भुवि व्यापितम्= विशेषेण प्रदर्शितमित्यर्थ इति ।। ४० ।।

चर्को ईषत् श्वासवाला जानें । यह शास्त्र वाणीका धाम कहलाता है । जिससे दाक्षीके पुत्र पाणिनिने संसारमें इस शास्त्रका प्रदर्शन किया है ।। ४० ।।

संप्रति वेदाङ्गानि साङ्गवेदाध्ययने फलञ्चाह—

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥ ४१ ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ ४२ ॥

छन्द इति ॥ वेदस्य पादौ छन्दः=पिङ्गलमुनिविरचितछन्दःशास्त्रम् । हस्तौ कल्पः पठ्यते, कल्पः=कल्पसूत्रं शाखान्तरीयगुणोपसंहारेण वैदिकानुष्ठानक्रमविशेषज्ञानफलकम् । चक्षुः ज्योतिषामयनं=ज्योतिष्शास्त्रं लगधगर्गादिप्रणीतम् । श्रोत्रं निरुक्तं वैदिकमन्त्रपदानामर्थज्ञानाकांक्षायां तदर्थे भगवता यास्केन—'समाम्नायः समाम्नातः' इत्यादि त्रयोदशाध्यायात्मकमारचितमुच्यते । वेदस्य घ्राणं शिक्षा स्मृता । मुखञ्च व्याकरणं स्मृतम् । अत्र तु शब्दश्चार्थे । यतः अङ्गविकले अनिष्टम्, तस्मात्साङ्गं वेदमेवाधीत्य ब्रह्मलोके महीयते=पूज्यते ॥ ४१-४२ ॥

वेदके पाद छन्द हैं, हाथ कल्प कहलाते हैं । आँख ज्योतिःशास्त्र है, कान निरुक्त है । शिक्षा नाक है तथा व्याकरणको वेदका मुख कहा गया है । अतः अङ्गोंके साथ वेदका अध्ययन कर अध्येता ब्रह्मलोकमें पूजित होता है ॥ ४१-४२ ॥

तस्मात्साङ्गमधीत्यैवेति । ननु कथं छन्दश्शास्त्रादीनां वेदाङ्गत्वम् ? वेदस्य नित्यत्वात्, नापि तादर्थ्यात्तादर्थ्यबोधकश्रुतिलिङ्गादीनामभावादिति चेन्न, उपकारकत्वेन तेष्वङ्गत्वव्यवहारात्, ननु तेषामनित्यत्वान्नित्यवेदाङ्गत्वमेवमपि न युज्यत इति चेन्न, स्मृतीनां नित्यत्वात्पाणिन्यादीनां स्मृतीनां स्मारकत्वात् । एतेन मन्वादिस्मृतयोऽपि नित्या इति वेदितव्यम् । स्पष्टञ्चेदं लघुमञ्जूषायाम् छन्दश्शास्त्रादीनामङ्गत्वमभिप्रेत्यैवोक्तं वाचस्पतिमिश्रैः—षड्भिरङ्गैरुपेताय विविधैरव्ययैरपि । शाश्वताय नमस्कुर्मो वेदाय च भवाय च ॥ श्लो० ३ ॥ अत्र साङ्गवेदाध्ययनविषयीभूतो वेदः स्वशाखारूपो बोध्यः । अन्यथा सकलशाखस्य संप्रति पठनाद्यसम्भवात्, शिक्षादिप्रणयनमनर्थकं स्यादिति ॥ ४२ ॥

सम्प्रति सामवेदस्य विशिष्टोच्चारणविधिमाह—

उदात्तमाख्याति वृषोऽङ्गुलीनां प्रदेशिनीमूलनिविष्टमूर्द्धा ।
उपान्तमध्ये स्वरितं द्रुतञ्च कनिष्ठिकायामनुदात्तमेव ॥ ४३ ॥

उदात्तमिति ॥ अङ्गुलीनां वृषः श्रेष्ठः अङ्गुष्ठ इति यावत् । प्रदेशिनीमूले निविष्टमूर्द्धा यस्य स तथाभूतः सन् उदात्तमाख्याति । उपान्तमध्ये अन्तःकनिष्ठिका उपान्तमनामिका तन्मध्ये निविष्टमूर्द्धाऽङ्गुष्ठः द्रुतं यथा स्यात् तथा स्वरितमाख्याति । कनिष्ठिकायां = कनिष्ठिकाया मध्ये निविष्टमूर्द्धाऽङ्गुष्ठः अनुदात्तमेवाख्याति, नान्यस्वरमित्यर्थः ॥ ४३ ॥

वृद्धाङ्गुलीके अग्रभागको प्रदर्शनीके मूलमें रखकर उदात्त स्वरका उच्चारण करते हैं; अनामिकाके मध्यमें रखकर स्वरितका तथा कनिष्ठिकाके मध्यमें रखकर अनुदात्त स्वरका उच्चारण करते हैं ॥ ४३ ॥

पूर्वोक्तार्थमेव पुनः द्रढयति—

उदात्तं प्रदेशिनीं विद्यात् प्रचयं मध्यतोऽङ्गुलिम् ।
निहतं तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम् ॥ ४४ ॥

उदात्तमिति ॥ उदात्तं प्रदेशिनीं प्रदेशीनीसाध्यं विद्यात् (प्रदेशिनीसाध्ये लक्षणया प्रदेशिनीपदप्रयोगः, एवमग्रेऽपि) प्रचयं मध्यतोऽङ्गुलिं मध्यमांगुलिसाध्यं विद्यात् । निहतमनुदात्तं कनिष्ठिकासाध्यं विद्यात् । कनिष्ठिकाशब्दादमि अकारस्य च यादेशेऽलोपे कनिष्ठिक्यामिति । स्वरितम् उपकनिष्ठिकां कनिष्ठिकासमीपवर्त्यनामिकामिति । अत्र ह्रस्वाभावश्च छान्दस इति । इदं प्रक्षिप्तं भाति ॥ ४४ ॥

उदात्त स्वर प्रदेशिनीसाध्य जानें । प्रचय मध्यमाङ्गुलिसाध्य, अनुदात्त कनिष्ठिकाङ्गुलिसाध्य तथा स्वरित कनिष्ठिकाके समीपवर्त्ति अनामिकाङ्गुलिसाध्य जानें ॥ ४४ ॥

नवपदशय्यामाह—

अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितम् ।
मध्योदात्तं स्वरितं द्व्युदात्तं त्र्युदात्तमिति नवपदशय्या ॥४५॥

अन्तोदात्तमिति ।। अन्तोदात्तमित्यादिस्वराणां नवपदशय्या, नवसु पदेषु स्थितिर्भवतीत्यर्थः ।। ४५ ।।

अन्तोदात्त, आद्युदात्त, उदात्त, अनुदात्त, नीच-स्वरित, मध्योदात्त, स्वरित, द्व्युदात्त, त्र्युदात्त—इन स्वरोंकी नौ पदोंमें स्थिति होती है ।। ४५ ।।

अग्निः सोमः प्र वो वीर्य्यं हविषां स्वर्बृहस्पतिरिन्द्राबृहस्पती
अग्निरित्यन्तोदात्तं सोम इत्याद्युदात्तम् ।
प्रेत्युदात्तं व इत्यनुदात्तं वीर्य्यं नीचस्वरितम् ।।४६।।
हविषां मध्योदात्तं स्वरिति स्वरितम् ।
बृहस्पतिरिति द्व्युदात्तमिन्द्राबृहस्पती इति त्र्युदात्तम् ।।४७।।

अग्निः सोम इति ।। निगदव्याख्याते इमे ।। ४६–४७ ।।

'अग्निः सोमः प्र वो वीर्यं हविषां स्वर्बृहस्पतिरिन्द्राबृहस्पती' इस उदाहरणमें 'अग्निः' अन्तोदात्त, 'सोमः' आद्युदात्त, 'प्र' उदात्त, 'व' अनुदात्त, 'वीर्यं' नीचस्वरित, 'हविषां' मध्योदात्त, 'स्वर्' स्वरित, 'बृहस्पति' द्व्युदात्त तथा 'इन्द्राबृहस्पती' त्र्युदात्त है ।। ४६–४७ ।।

इदानीं स्वरोच्चारणकाले हस्तप्रक्षेपविधिमाह--

अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः ।
स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ।। ४८ ।।

अनुदात्त इति ।। हृदि=हृद्देशे करं कृत्वा अनुदात्तस्वरः ज्ञेयः=उच्चारणीयः । मूर्ध्नि=मूर्धदेशे हस्तं धृत्वा उदात्तः=उदात्तस्वर उदाहृतः=उच्चार्यः । स्वरितः कर्णमूलीयः=कर्णमूले करं निधाय स्वरितस्वर उच्चार्यः । सर्वास्ये=सर्वमुखसमीपदेशे हस्तं निधाय प्रचयः=प्रचयः स्वरः स्मृतः=उच्चार्यः । प्रचयलक्षणं तु पराङ्कुशशिक्षायामुक्तम्--उदात्तान्निहतः स्वारः स्वरितात्प्रचयो भवेत् । उदात्तस्वरितात्पूर्वो न्याय आपद्यते स्वरः ।। ४८ ।।

हृदयमें हाथको रखकर अनुदात्तका, मूर्धामें उदात्तका, कर्णमूलमें स्वरितका तथा सभी मुखके समीप देशमें हाथ रखकर प्रचयस्वरका उच्चारण करे ।।४८।।

इदानीं मात्रोच्चारणं पक्षिभिः साधु क्रियते, तेभ्यः तत् शिक्ष्यमिति वदति—

चाषस्तु वदते मात्रां द्विमात्रं चैव वायसः ।
शिखी रौति त्रिमात्रं तु नकुलस्त्वर्द्धमात्रकम् ॥ ४९ ॥

चाषेति ॥ स्पष्टोऽर्थः । अत्र वदते इति आत्मनेपदं छान्दसम् । अथवा वदते उच्चारयित्रे पुरुषाय । मात्रां मात्रोच्चारणविधिशिक्षां चाषो ददाति, इत्याद्यर्थो बोध्यः । एवं च मात्राद्युच्चारणं चाषादिभ्यः शिक्षणीयमिति ॥४९॥

नीलकण्ठ पक्षी एक मात्रा ह्रस्व अक्षरका, कौआ द्विमात्रा दीर्घ अक्षरका, मयूर त्रिमात्रा प्लुत अक्षरका तथा नेवला अर्द्धमात्राका उच्चारण करता है ॥ ४९ ॥

अशिष्टाध्यापकाधीतत्वादिदोषयुक्तपठनं निन्दति—

कुतीर्थादागतं दग्धमपवर्णं च भक्षितम् ।
न तस्य पाठे मोक्षोऽस्ति पापाहेरिव किल्बिषात् ॥ ५० ॥

कुतीर्थात्=आचारहीनात् गुरोः आगतं=शिक्षितं दग्धं=नीरसमिव अपवर्णम्=अपकृष्टा अपकृष्य अर्थं प्रापिता वर्णा यस्य तदपवर्णम् । गुरोरनधीतं भक्षितमिव यद्ब्रह्म वर्तते तस्य पाठे पापाहेः=दुष्टसर्पादिव मोक्षः अध्येतुर्नास्ति । अत्र च शब्द इवार्थे ॥ ५० ॥

आचारहीन गुरुसे प्राप्त नीरस, निरर्थक तथा सुव्यक्तता-रहित वेदका पाठ करनेपर दुष्टसर्पकी तरह अध्येताका मोक्ष नहीं होता है ॥ ५० ॥

संप्रदायशुद्धवेदाध्ययने फलमाह—

सुतीर्थादागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितम् ।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥ ५१ ॥

सुतीर्थादिति ॥ सुतीर्थात्=सदाचारनिरतात् गुरोः आगतम्=अधीतं व्यक्तम्=स्पष्टतयोच्चारितं स्वाम्नाय्यं=संप्रदायशुद्धं सुव्यवस्थितम् सुस्वरेण=उदात्तादिना सुवक्त्रेण कण्ठादिना प्रयुक्तम् उच्चारितं ब्रह्म=वेदः राजते=शोभते ॥ ५१ ॥

आचारयुक्त गुरुसे प्राप्त सुव्यक्त, संप्रदायसे शुद्ध, सुव्यवस्थित, सुस्वरयुक्त, कण्ठादिसे प्रयुक्त ज्ञान शोभायमान होता है ॥ ५१ ॥

शब्दस्य स्वरवर्णादिदुष्टत्वेऽनिष्टमाह—

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥५२॥

मन्त्र इति ॥ स्वरतः=स्वरेण, वर्णतः=वर्णेन वा हीनः=रहितः मन्त्रः मिथ्याप्रयुक्तः, सन् तम्=अभीप्सितम् अर्थं न आह=न कथयति। स मन्त्रो वाग्वज्रं भूत्वा यजमानं हिनस्ति=नाशयति, अनिष्टावाप्तिं करोतीति यावत्। अत्र दृष्टान्तमाह—यथेति। यथा स्वरतः=स्वरस्य अपराधात्=स्वरकृतदोषात् इन्द्रशत्रुः इन्द्रशत्रुशब्दो यजमानं हिनस्ति हिंसितवानित्यर्थः।

अत्रेदमवधेयम्—पुरा किल विश्वरूपनामके त्वष्टुः पुत्रे इन्द्रेण निहिते रुष्टस्त्वष्टा इन्द्रस्य हन्तारं पुत्रान्तरमुत्पिपादयिषुराभिचारिकं यागं कृतवान्। तत्रेन्द्रशत्रुर्वर्धस्वेति मन्त्र ऊहितः। तत्र तत्पुरुषप्रयुक्तान्तोदात्तत्वे कर्तव्ये बहुव्रीहिप्रयुक्त आद्युदात्त ऋत्विजा प्रयुक्त इत्यर्थान्तराभिधानादिन्द्रेण सोऽपि हत इति। अत्र शत्रुशब्दः क्रियाशब्दो न तु अमित्रपर्यायो रूढः। तदाश्रयणे हि बहुव्रीहितत्पुरुषयोरर्थभेदो न स्यात्। क्रियाशब्दत्वे इन्द्रस्य शातयिता भवेत्यर्थबोधनाय प्रयोगे तत्पुरुष एव उचितः, बहुव्रीहौ इन्द्रः शातयिता यस्येत्यर्थः स्यादिति। तस्मात् शत्रुशब्दः क्रियाशब्दोऽत्रेति बोध्यम्। अत्र मन्त्रशब्दः शब्दमात्रपरः, अन्यथा हि तस्य मन्त्रत्वाभावेन तदसंगतिः स्पष्टैव। अत एव भाष्ये प्रसिद्धमपि 'मन्त्रो हीनः' इति शिक्षापाठं विहाय 'दुष्टः शब्दः' इति पठितम्। न च अस्या-

---

मन्त्रो हीनः स्वरत इति। स्वरेणेत्यर्थः। स्वरशब्दादाद्यादित्वात्तसिः, एवं वर्णत इत्यत्रापि बोध्यम्। "हीयमानपापयोगाश्च" इत्यस्य तु न प्राप्तिः तत्र हीनेत्यस्याऽपाठादिति।

यजमानं हिनस्तीति। ननु स्वरादीनां सम्यगुच्चारणाभाव ऋत्विजां दोष इति कथमन्यकृतदोषेणान्यस्य नाश इति चेन्न, ऋत्विगादिकृतहोमाद्यजमाने धर्मोत्पत्तिरिव तत्कृतापशब्दप्रयोगाद्यजमाने प्रत्यवायोत्पत्तिरिति स्वीकारात्॥ ५२॥

मन्त्रत्वे लौकिकशब्देन क्रियमाणकर्मणः कथं फलजनकत्वमिति वाच्यम्, 'ऊह'-विधायकशास्त्रबलादिति गृहाण । स्पष्टमिदमुद्द्योते ॥ ५२ ॥

स्वरसे तथा वर्णसे रहित मिथ्या प्रयुक्त मन्त्र अभीष्ट अर्थको नहीं प्रदान करता है । वह मन्त्र वाणीरूपी वज्र बनकर यजमानका नाश करता है, जिस प्रकार कि स्वरके दोषसे 'इन्द्रशत्रुः' शब्द यजमानका नाश किया है ॥ ५२ ॥

पुनरपि दुष्टोच्चारणं निन्दति--

अवक्षरमनायुष्यं विस्वरं व्याधिपीडितम् ।
अक्षता शस्त्ररूपेण वज्रं पतति मस्तके ॥ ५३ ॥

अवक्षरमिति ॥ अवक्षरं=दुष्टाक्षरम् । अनायुष्यम्=आयुर्नाशकं भवति । विस्वरम् = स्वररहितम् अधीतं ब्रह्म=वेदः । व्याधिपीडितम्=व्याधिना पीडितो व्याधिपीडितस्तं व्याधिपीडितं व्याधियुक्तं पाठकम्, करोतीति शेषः । अक्षता शस्त्ररूपेण कुण्ठितशास्त्ररूपं ब्रह्म वज्रं वज्ररूपं सत् मस्तके (वक्तुरिति शेषः) पतति । एवं च इत्थं नोच्चार्यमिति भावः । अत्र अक्षता शस्त्ररूपेणेत्यत्र च प्रकृत्यादित्वात् तृतीया तदर्थस्तु अभेद इति ॥ ५३ ॥

दुष्टाक्षर आयुका नाशक होता है । स्वररहित पाठ अध्येताको व्याधि-युक्त बनाता है । कुण्ठित शास्त्ररूप पाठ वज्ररूप बन वक्ताके मस्तकपर गिरता है ॥ ५३ ॥

पुनरपि उक्तं दृढं करोति--

हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् ।
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥ ५४ ॥

हस्तेति ॥ यः=पाठकः हस्तहीनं हस्तेन=उदात्तादिस्वरसूचकेन आकार-विशेषेण हीनं=रहितं स्वरवर्णविवर्जितम् अधीते । स ऋग्यजुःसामभिर्दग्धः वियोनिं = श्वसूकरादियोनिमधिगच्छति=प्राप्नोति इति । वस्तुतस्तु इदं श्लोकद्वयं प्रक्षिप्तं भाति, एतदुक्तार्थस्य 'मन्त्रो हीन' इत्यनेनैव गतार्थत्वा-दिति ॥ ५४ ॥

जो स्वरोंके सूचक हस्तचालनसे रहित, सम्यक् स्वर तथा वर्णोंके उच्चा-रणसे रहित अध्ययन करता है, वह ऋग् यजुः सामसे दग्ध हो शूकर आदि योनिको प्राप्त करता है ॥ ५४ ॥

हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम् ।
ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ।। ५५ ।।

हस्तेनेति ।। यः स्वरवर्णार्थसंयुतं वेदं हस्तेन=उदात्तादिज्ञापकेन अधीते । स ऋग्यजुःसामभिः पूतः सन् ब्रह्मलोके महीयते=पूज्यते, देवैरिति शेषः ।। ५५ ।।

जो सम्यक् स्वर, वर्ण तथा अर्थयुक्त, स्वरसूचक हस्तचालन पूर्वक वेदका अध्ययन करता है, वह ऋग्, यजुः, सामसे पवित्र हो ब्रह्मलोकमें पूजित होता है ।। ५५ ।।

इदं शास्त्रं संप्रदायादागतमिति दर्शयन्नाह—

शंकरः शांकरीं प्रादाद्दाक्षीपुत्राय धीमते ।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ।। ५६ ।।

शङ्करेति ।। शंकरः=शिवः वाङ्मयेभ्यः = वेदेभ्यः समाहृत्यैकीकृत्य शाङ्करीं शङ्करस्येयं शांकरी ताम् स्वसम्बधिनीं देवीं वाचं=व्याकरणविद्यां शिक्षाविद्यां च धीमते=ऊहापोहकुशलाय दाक्षीपुत्राय=पाणिनये प्रादात्=ददौ इति स्थितिः=संप्रदायः ।। ५६ ।।

शिवने वैदिक वाङ्मयसे संग्रहकर स्वसम्बन्धिनी व्याकरण विद्या तथा शिक्षा विद्याको बुद्धिमान् दाक्षीके पुत्र पाणिनिको प्रदान किया, यह सम्प्रदाय है ।। ५६ ।।

ग्रन्थान्ते मङ्गलमाचरणीयमिति शिष्टाचारान्नमस्कारात्मकं मङ्गलं विदधाति—

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ।। ५७ ।।

येनेति ।। येन महेश्वरात् शिवात् अक्षरसमाम्नायम्=अइउण् इत्यादि-चतुर्दशसूत्रसमूहम् अधिगम्य=ज्ञात्वा कृत्स्नं=संपूर्णम् व्याकरणं प्रोक्तं तस्मै=परोपकर्त्रे पाणिनये नमः ।। ५७ ।।

जिसने महेश्वरसे अक्षर-समाम्नाय अर्थात् 'अइउण्' आदि चतुर्दश सूत्र-समूहका ज्ञान प्राप्तकर सम्पूर्ण व्याकरण शास्त्रको कहा है, उस पाणिनिजीको नमस्कार है ।। ५७ ।।

येन धौता गिरः पुंसां विमलैः शब्दवारिभिः।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥ ५८ ॥

येनेति ॥ येन=पाणिनिना विमलैः शब्दवारिभिः पुंसां गिरः धौताः=क्षालिताः, अज्ञानजम्=अज्ञानजन्यं तमः भिन्नं=नाशितं, तस्मै पाणिनये नमः ॥ ५८ ॥

जिसने विमल शब्दरूपी जलसे पुरुषोंकी वाणीका प्रक्षालन किया है तथा अज्ञानसे उत्पन्न जड़ताका नाश कर दिया है, उस पाणिनिजीको नमस्कार है ॥ ५८ ॥

अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥ ५९ ॥

अज्ञानेति ॥ ज्ञानाञ्जनशलाकया ज्ञानमेवाञ्जनशलाका तया अज्ञानान्धस्य अज्ञानेन अन्धस्तस्य लोकस्य चक्षुः येन उन्मीलितं तस्मै पाणिनये नमः ॥ ५९ ॥

तस्मै पाणिनये नम इति। ननु शिक्षापाणिनिकृतेति स्थितिः। तथा च स्वेन स्वस्य नमस्कारकरणमयुक्तम्, उत्कर्षापकर्षाभावादिति चेन्न, पाणिनिपदवाच्यस्य जीवस्य कर्तृत्वेन पाणिनिपदलक्ष्यस्य ब्रह्मणो नमस्कारकर्मत्वेन विरोधाभावात् न च लक्ष्यस्य ब्रह्मणो निर्गुणत्वेन कथं नमस्कारविषयत्वमिति वाच्यम्, सोपाधिकस्य सर्वज्ञात्वादिविशिष्टस्यैव लक्ष्यत्वात्। अत एवाद्वैतसिद्धान्ते जीवब्रह्मणोरभेदेऽपि न नमस्कारानुपपत्तिः, कल्पितभेदमादाय तदुपपत्तेरिति।

वस्तुतस्तु आचार्यैः स्वशिष्यकृता स्तुतिः, तत्प्रीत्यर्थं प्रबन्धमधिरोपिता। तेन शिष्यकृतो नमस्कार इति न काचिदनुपपत्तिः। इमामेव सरणिमाश्रित्याचार्यवाचस्पतिमिश्रैः स्वशिष्यकृतस्तुतिर्भामतीप्रबन्धमधिरोपिता—शङ्के संप्रति निर्विशङ्कमधुना स्वाराज्यसौख्यं वहन् नेन्द्रः सान्द्रतपःस्थितेषु कथमप्युद्वेगमभ्येष्यति। यद्वाचस्पतिमिश्रनिर्मितमितव्याख्यानमात्रस्फुरद्वेदान्तार्थविवेकवञ्चितभवाः स्वर्गेऽप्यमी निस्पृहाः। (आ० ४ पा० १ श्लो० २) एतेन शिक्षा न पाणिनिकृता, किन्तु तदनुजन्मपिङ्गलाचार्यकृतेति निरस्तम्, पाणिनिकर्तृत्वे बाधकाभावात्। सम्मेने च भगवान् मधुसूदनाचार्यः शिक्षा पाणिनिकृतेति महिम्नःस्तोत्रटीकायामिति। एवञ्च मन्वादिस्मृतयोऽपि मन्वादिकृता व वेदितव्या इतिदिक् ॥ ५९ ॥

जिसने ज्ञानरूपी अञ्जनशलाकासे अज्ञानसे अन्ध बने लोककी आँखोंका उन्मीलन किया है, उस पाणिनिजीको नकस्कार है ।। ५९ ।।

शिक्षाप्रयोजनमधिकारिनिरूपणं च कुर्वन् ग्रन्थस्य समाप्तिं करोति—

त्रिनयनमभिमुखनिःसृतामिमां
य इह पठेत् प्रयतश्च सदा द्विजः ।
स भवति धनधान्यपशुपुत्रकीर्तिमा-
नतुलं च सुखं समश्नुते दिवीति दिवीति ।। ६० ।।

इति पाणिनीयशिक्षा समाप्ता ।

——:०:——

त्रिनयनेति ।। यो द्विजः प्रयतः=इन्द्रियजित्सन् इमां=शिक्षां त्रिनयनमभिमुखनिःसृतां=शम्भुमुखान्निर्गतां पठेत् । स इह लोके धनधान्यपशुपुत्रकीर्तिमान् भवति । दिवि अतुलं सुखं मोक्षं च समश्नुते, इति । अत्र दिवीति द्विर्वचनम् समाप्तिसूचकम् ।

अत्रेदं बोध्यम्—ग्रन्थे विषयाधिकारिप्रयोजननिरूपणस्यावश्यकत्वमितीहापि प्रथमश्लोके शिक्षेति विषयनिर्देशः । अस्मिन् श्लोके द्विज इति अधिकारिणो मोक्षावाप्तेः पुत्रादिमत्त्वरूपफलस्य च निर्देश इति सर्वं सम्पन्नम् ।

इयं शिक्षा एकादशखण्डात्मिका । प्रतिखण्डञ्च पंच श्लोकाः । तत्र अथ शिक्षामिति प्रथमः, आत्मेति षष्ठः, उदात्तश्चेत्येकादशः, हकारमिति षोडशः, एवं सर्वत्र बोध्यम् । एवञ्चास्मिन्ग्रन्थे पञ्चपञ्चाशच्छ्लोका इति बोध्यम् । प्रक्षिप्तस्तु पञ्च । तेषां निरूपणं तद्व्याख्याने कृतमेवेति । शिवम् ।। ६० ।।

इति श्रीमदयोध्यास्थराजगोपालपाठशालाप्रधानाध्यापकेन न्यायव्याकरणाचार्येण अवस्थ्युपनामकेन पण्डितश्रीरुद्रप्रसादशर्मणा विरचिता प्रदीपव्याख्या समाप्ता ।

जो द्विज जितेन्द्रिय हो शम्भुके मुखसे निकली इस शिक्षाका पाठ करता है; वह इस लोकमें धन, धान्य, पशु, पुत्र तथा कीर्तिवाला बनता है, स्वर्गमें अतुल सुख तथा मोक्षका भोग करता है ।। ६० ।।

पाणिनीयशिक्षामें 'प्रह्लाद' हिन्दी व्याख्याकी समाप्ति हुई ।।

——:०:——

अथ स्वरवैदिकपंक्तिविवरणम्

वैदिकप्रक्रियाया लौकिकप्रक्रियातो भेदहेतुकथनम् ।। १ ।।

ननु, 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति भाष्यात् 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति श्रुतेश्च कृत्स्नस्यैव व्याकरणस्य वैदिकशब्द-साधुत्वार्थं प्रवृत्ततया वैदिकशब्दानां लौकिकशब्दाऽभिन्नतया च स्वरवैदिकप्रक्रि-ययोः लौकिकप्रक्रियातः पृथक् कृतेः क आशय इति चेदत्रोच्यते–'लौकिकशब्देभ्यः आत्मना जहार देवाः देवैरित्यादिभ्यो भिन्नानामात्मना जभार देवासः देवेभिरि'-त्यादीनां वैदिकशब्दानां सत्त्वेन तन्मात्रव्युत्पादकवैदिकप्रक्रियायाः पृथक्करणम् ।

अत एव केषां शब्दानां, लौकिकानां वैदिकानाञ्चेति महाभाष्ये लौकिकेभ्यो भिन्नतयैव वैदिकान् व्याहरति भगवान् भाष्यकारः ।

स्वरस्तु लौकिकप्रयोगे काव्यादौ नाद्रियत इति, तत्प्रक्रियाया अपि लौकिक-प्रक्रियातः पृथक्करणमिति बोध्यम् ।। १ ।।

तयोर्य्वावचि संहितायाम् ।। २ ।।

इदुतोर्यकारवकारौ स्तोऽचि संहितायाम् इति सूत्रार्थः । अग्ना ३ याशा । पटा ३ वाशा । अग्ना ३ यिन्द्रम् । पठा ३ वुदकम् इत्युदाहरणानि । नन्विदं सूत्रं व्यर्थम् अग्ना३ याशा इत्यादेः 'इको यणचि' इति यणैव सिद्धेरिति चेन्न, एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतः' इति सूत्रस्य त्रैपादिकत्वेन यणं प्रत्यसिद्धतया अग्ना ३ याशा इत्यत्र इकारस्येको यणचीति यणोऽप्राप्तेः ।

न च प्लुतस्यासिद्धत्वेन तस्य स्वरसन्ध्याख्यविकाराऽप्राप्त्या 'प्लुतप्रगृह्या अचि नित्यम्' इति प्लुतस्य प्रकृतिभावविधानमनर्थकं सत् 'असति बाधके प्रमाणानां सामान्ये पक्षपातः' इति न्यायेन प्लुतप्रकरणे यत्कार्यं तत्स्वरसन्धिषु सिद्धमिति ज्ञापयति । एवञ्च यणं प्रतीकारस्याऽसिद्धत्वाभावेन अग्ना३ याशा इत्यत्र यण् सिद्धिरिति वाच्यम्, एवमपि, अग्ना३ यिन्द्रम्, पटा३ वुदकमित्यत्र 'इको यणचि' इति बाधित्वा प्रसक्तम् 'अक सवर्णे दीर्घः, इति दीर्घम्बाधित्वा इदुतोर्य-कारवकारयोर्विधानाय 'तयोर्य्वावचि' इत्यस्यावश्यकत्वात् । अग्ना ३ याशा, पटा ३ वाशा इत्यत्र 'इकोऽसवर्णे' इति पाक्षिकह्रस्वबाधनार्थमावश्यकत्वाच्च ।

न च भोःशब्दस्य छान्दसः प्लुतस्ततः भो३ इ इन्द्र इत्यत्र इकारस्य निपातत्वेन प्रगृह्यतया यणोऽप्राप्त्या 'प्लुतपूर्वस्य यणादेशो वक्तव्यः' भो ३ यिन्द्र इत्यर्थमिति वार्तिकेन अग्ना ३ याशा इत्यादौ शाकलह्रस्वत्वस्य सवर्णदीर्घत्वस्य च बाधेनेष्टसिद्धिः। न हि भो ३ यिन्द्र इत्यत्र 'तयोर्य्वावचि' इति सिद्धिः इकारस्य प्लुतविकारत्वाभावादिति वाच्यम्, अग्ना ३ याशा इत्यादौ यवयोरसिद्धत्वात् 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इति स्वराऽप्रवृत्यर्थं 'तयोर्य्वावचि' इत्यस्यावश्यकत्वात्। अन्यथा वार्तिकविहितयणस्सिद्धतया यकारोत्तरवर्त्याकारस्य स्वरितत्वाऽऽपत्तिरिति दिक्।

तदयमत्र संग्रहः—

किन्तु यणा भवतीह न सिद्धं य्वाविदुतोर्यदयं विदधाति।
तौ च मम स्वरसन्धिषु सिद्धौ शाकलदीर्घविधी तु विवर्त्यौ ॥ १ ॥

इक् च यदा भवति प्लुतपूर्वस्तस्य यणं विदधात्यपवाद्यम्।
तेन तयोश्च न शाकलदीर्घौ यण्स्वरबाधनमेव तु हेतुः ॥ ॥ २ ॥

गोपायतं नः ॥ ३ ॥

अत्र 'सनाद्यन्ता धातवः' इति धातुत्वे धातुस्वरेण यकाराकार उदात्तः, शिष्टमनुदात्तम्।

ननु गुपेर्धातुस्वर आयस्य प्रत्ययस्वरो वोदात्तः कथं न शिष्यते इति चेदत आह—सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति। यो हि यस्मिन् सति शिष्यते स सतिशिष्टः तस्य बाधको महतीत्यर्थः। तथा च पश्चात् प्रवृत्तत्वात्सति शिष्टो यकाराकारस्वरोऽतो बलवान् सन् शिष्यते।

अत्रेदं बोध्यम्—सति शिष्टस्य बाधकत्वं न्यायसिद्धम्। तथा हि—कार्य्यकालपक्षे उदात्तस्वरितविधिभिरेकवाक्यतापन्नया 'अनुदात्तं पदमेकवर्जम्' इति परिभाषया शेषनिघातः क्रियते। तत्रोत्सर्गस्य अपवादस्य वा या चरमा प्राप्तिस्तदेकवाक्यतापन्नया अनया पूर्वा प्रवृत्तिर्बाध्यते इति। यत्र तु औपगवत्वमित्यादौ अण्प्रत्यये प्रवर्तमानः 'आद्युदात्तश्च' इति पुनः त्वप्रत्यये प्रवर्तते तत्र

स्वस्यैव पूर्वा प्रवृत्ति स्वं बाधते इति द्वितीयप्रवृत्त्या लक्ष्यं परिनिष्ठितं भवतीति ।

अन्यत्र विकरणेभ्य इति तु 'तास्यनुदात्तेदि'ति तासेः परस्य लसार्वधातुकस्य यदनुदात्तविधानं तत्सिद्धम् । तथा हि—यद्यपि लावस्थाया तासिर्विधीयते तथापि लसामान्यपेक्षत्वेनान्तरङ्गत्वात् परत्वाद्वा लादेशेषु कृतेषु पश्चात्तासिरिति सति शिष्टत्वाच्छेषनिघातेनैव सिद्धेरनर्थकं सत् तासेः परस्य लसार्वधातुकस्यानुदात्तविधानमन्यत्र विकरणेभ्य इत्यत्र ज्ञापकं भवतीति ॥ ३ ॥

खलप्व्याशा ॥ ४ ॥

अत्र खलप्शब्दः कृदुत्तरपदप्रतिस्वरेणान्तोदात्तः । तस्य 'ओः सुपि' इति यण् स उदात्तयण् ततः परो ङिप्रत्ययः सुप्त्वादनुदात्तः । तस्य 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इति स्वरितत्वम् । तस्य च स्वरितेकारस्य यणि ततः परस्याशाशब्दाद्यकारस्य अनेनैव स्वरितत्वम् । आशाशब्दश्च 'आशाया अदिगाख्या चेत्' इत्यन्तोदात्तत्वादनुदात्तादिः । अत्र शेषनिघातस्तु न, अस्य स्वरितस्यासिद्धत्वादिति ।

ननु 'अनुदात्तं पदमेकवर्जमि'ति परिभाषायाः कार्यकालत्वेन त्रिपाद्यामपि प्रवृत्त्यापत्तौ शेषनिघातापत्तिर्दुर्वारा । न च तव्यतः तित्वेनेयं त्रिपाद्यां न प्रवर्त्तते । तथा हि तत्र प्रवृत्तौ प्रत्ययस्वरेणाद्युदात्तत्वे शेषनिघाते तस्य 'उदात्तादनुदात्तस्ये'ति स्वरितत्वे शेषनिघातेन सिद्धौ तद्वैयर्थ्यं स्पष्टमेव । एवं "यतोऽनाव" इत्यपि त्रिपाद्यामप्रवृत्तौ मानमन्यथा काम्य इत्यादौ "यतोऽनाव" इत्याद्युदात्ते कृते शेषनिघाते 'उदात्तादनुदात्तस्ये'ति स्वरिते शेषनिघाते तित्वप्रयुक्तान्तस्वरितादविशेषेण तद्वैयर्थ्यं स्पष्टमेवेति वाच्यम् ? सन्निपातपरिभाषया 'उदात्तादनुदात्तस्य स्वरितः' इति विषये शेषनिघाताप्रवृत्त्या तयोश्चारितार्थ्यात् । कर्तव्यं तत्र । कर्तव्यं क्व ? कण्ठ्यः तत्र, कण्ठ्यः क्व इत्यादौ "नोदात्तस्वरितोदयमि"ति "उदात्तादनुदात्तस्ये"त्यस्य निषेधे तयोश्चारितार्थ्याच्चेति चेन्न, लक्ष्यानुसारेण स्वरितत्वप्रतिज्ञाबलेन च "अनुदात्तं पदमेकवर्जमि"त्यस्य त्रिपाद्यामप्रवृत्तेरित्यलम् ॥ ४ ॥

संज्ञायामुपमानम् ।। ५ ।।

चञ्चाशब्दात् कनि तस्य लुपि उपमानभूतः संज्ञायां वर्तमानः चञ्चाशब्दोऽनेनाद्युदात्तः । ननु इदं सूत्रं व्यर्थं "ञ्नित्यादिर्नित्यम्" इति सिद्धेः । नच ञित् नित्परत्वाभावः, प्रत्ययलक्षणं तु न "न लुमताङ्गस्य" इति निषेधादिति वाच्यम्? सौवर्य्यः सप्तम्यः तदन्तसप्तम्य इति स्वीकारेण ञ्नितीत्यस्य ञिदन्तस्य निदन्तस्य चेत्यर्थसत्त्वेन "न लुमताङ्गस्य" इत्यस्याप्राप्तेः प्रत्ययलक्षणसत्त्वात् ।

न च सौवरीणां सप्तमीनां तदन्तसप्तमीत्वे मानाभावः ? "भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति" इति सूत्रे प्रत्यये पितीत्येव सिद्धेः पूर्वग्रहस्यैव मानत्वात् । तेन 'सर्वस्य सुपी'त्यस्य सुबन्तस्य सर्वस्येत्यर्थात् सर्वप्रिय इत्यादौ स्वरसिद्धिरिति चेदत्रोच्यते ? एतदेव ज्ञापयति क्वचित् स्वरविधौ प्रत्ययलक्षणं नेति । अत एव गर्गा विदा इत्यादौ यञो लुकि प्रत्ययलक्षणाप्रवृत्त्या न ञ्नित्स्वर इति ।। ५ ।।

फिषोऽन्त उदात्तः ।। ६ ।।

नन्वपाणिनीयानां फिट्सूत्राणां पाणिनिव्याकरणे आश्रयणे बीजाभावः । नच पाणिनीयान्येवेमानीति वाच्यम् ? "वृषादीनाञ्च, उञ्छादीनाञ्च" इत्याभ्याम् आकृतिगणाभ्यां क्रमेण आद्युदात्तत्वान्तोदात्तत्वयोः सिद्धौ "ग्रामादीनां घृतादीनाञ्चे"त्यनयोर्वैयर्थ्यापत्तेः ।

मम तु भिन्नकर्तृकत्वान्न दोष इति वाच्यम् ? "आद्युदात्तश्चे"ति सूत्रे "यत्राऽनुदात्ता प्रकृतिः समत्वं सिमत्वमिति प्रातिपदिकस्य चान्त इति प्रकृतेरन्तोदात्तत्वं शास्ति" इति भाष्याभ्याम् अपाणिनीयानामपि फिट्सूत्राणां पाणिनिव्याकरणे आश्रयणसूचनात् । "त्वत्वसमसिमेत्यनुच्चानि, फिषोऽन्त उदात्त" इति सूत्रयोरनादरणे तदासङ्गत्यं स्पष्टमेवेत्यलम् ।। ६ ।।

स्वरविधौ व्यञ्जनमविद्यमानवदित्येतदत्र नेष्यते ।। ७ ।।

ननु, मरुत्वानित्यत्र स्वरत्वधौ यंञ्जनमविद्यमानवदिति परिभाषया तकारस्याविद्यमानत्वेन ह्रस्वान्तात्परत्वस्य मतुपि सत्त्वेन "ह्रस्वनुड्भ्यां मतुप्"

इति स्वरापत्तिरत आह–स्वरविधौ व्यञ्जनमविद्यमानवदित्येतदत्र नेष्यते इति । अयम्भावः-"नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु" इति सूत्रे पृथिव्यादिपर्युदासो व्यर्थः उदात्तत्वादेरजधर्मतया पकारस्यैवादौ सत्त्वेनानुदात्तादित्वाभावादिति तत्सामर्थ्येन स्वरविधाविति परिभाषा कल्प्यते । ततश्च पकारस्याविद्यमानवत्त्वेन अनुदात्तादित्वसत्त्वात् "देवताद्वन्द्वे चे"ति प्राप्तप्रकृतिस्वरस्य निषेधप्राप्तौ पर्युदासः सार्थक इति । एवञ्च ज्ञापकसाजात्यात् स्वरत्वव्याप्यधर्माऽवच्छिन्नोद्देश्यताके बिधावेव स्वरविधावित्यस्य प्रवृत्त्या प्रकृते "ह्रस्वनुड्भ्यामि"-त्यस्य स्वरत्वव्याप्यधर्मावच्छन्नोद्देश्यताकत्वाभावात्परिभाषाऽप्रवृत्तौ मरुत्वानित्यत्र न स्वर इति ।

नच इषुमानित्यत्र "ह्रस्वनुड्भ्यामि"त्यस्याऽप्रवृत्तये 'अन्तोदात्ताद्'-त्यनुवृत्तेरावश्यकतया अस्याऽपि स्वरत्वव्याप्यधर्माऽवच्छिन्नोद्देश्यताकत्वमिति वाच्यम् ? स्वरत्वव्याप्यधर्मावच्छिन्नविषयतायाः प्रतिबन्धकं व्यंजनं न भवतीत्यर्थस्वीकारेण अन्तोदात्तत्वबुद्धेः प्रतिबन्धासम्भवेऽपि ह्रस्वान्तबुद्धेः प्रतिबन्धात् "ह्रस्वनुड्भ्यामि"त्यस्याप्रवृत्तेः । अत एव नुड्ग्रहणम् चरितार्थम् । अन्यथा ह्रस्वान्तत्वादेव सिद्धेः तद्व्यर्थं स्यादित्यलम् ॥ ७ ॥

गतिकारकोपपदात् कृत् ॥ ८ ॥

कृद्ग्रहणम् विस्पष्टार्थमिति । ननु क्रियायोगे गतिसंज्ञाविधानात् क्रियानिरूपितस्यैव कारकत्वात् धात्वधिकारे सप्तमीनिर्दिष्टस्यैव उपपदसंज्ञाविधानाच्च क्रियाबाचकधातोराक्षेपे तिङन्तयोगे समासाभावेन परिशेषात् कृदन्तयोगे एव समासासत्वेन स्वरप्रवृत्त्या कृद्ग्रहणं व्यर्थम् इति चेदत आह–कृदग्रहणं विस्पष्टार्थमिति ।

ननु विस्पष्टार्थकृद्ग्रहणसत्त्वेऽपि आमन्तेन समासे प्रपचतितरामित्यत्र कृदन्तत्वाभावेनास्याऽप्राप्त्या समासस्वरं बाधित्वाऽव्ययस्वरस्स्यादिति चेन्न, प्रशब्दस्य तरबन्तेन समासे तत आमि सति शिष्टत्वादाम् स्वरस्य सत्त्वेन अव्ययस्वराभावेनादोषात् ।

ननु प्रपचतितरशब्दस्य घान्तत्वाभावात् तत आमभावे एकदेशादामि तदन्तस्य

पचतितरामित्यस्यैव प्रातिपदिकत्वे तत एव सुपि तदन्तस्यैकपदत्वाभावात् प्रशब्दस्य स्वरः पृथक् श्रूयेतेति चेन्न, शिवभागवत इत्यादिवदर्थवत्सूत्रेणैव प्रविशिष्टस्य प्रातिपदिकत्वेनादोषात् ।

अन्ये तु प्रपचतितरामित्यत्र सति शिष्टस्वरान्तरस्य सत्त्वेन अव्ययपूर्वपदप्रकृतिस्वरप्रयुक्तदोषाऽभावेऽपि प्रपचतिदेश्येत्यत्र सति शिष्टस्वरान्तरस्याऽप्रवृत्त्या अव्ययस्वरं बाधित्वा गतिकारकेति स्वरो मा भूदित्यर्थं कृद्ग्रहणमित्याहुः ।

वस्तुतस्तु कृद्ग्रहणप्रत्याख्यानपरभाष्येण प्रपचतितराम् प्रपचतिदेश्येत्यत्र च गतिस्वर इष्यते एव। इमामेवारुचिमनुसन्धाय एके इति अन्ये इति च मूले उक्तमिति बोध्यम् ॥ ८ ॥

कारकादत्तश्रुतयोरेवाशिषि ॥ ९ ॥

ननु "संज्ञायामनाचितादीनामि"त्यनेन कारकात्परयोर्दत्तश्रुतयोरन्तोदात्ते सिद्धे "कारकादि"ति सूत्रं व्यर्थं सन्नियमार्थं "कारकत्तान्तस्यान्त उदात्त आशिषि संज्ञायां चेद्दत्तश्रुतयोरे"वेति । एवञ्च देवा एनं देयासुः देवदत्तः प्रार्थितैर्देवैर्दत्त इति विग्रहः । विष्णुरेनं श्रूयात् इति विष्णुश्रुतः । 'आशिषि लिङ्लेटावि'ति विग्रहे लिङ् उदाहरणे च 'क्तिच्क्तौ च संज्ञायामि'ति आशिषि क्तः ।

एवं च सूत्रे एवकारग्रहणं किमर्थमिति चेन्न, तदभावे आशिषि संज्ञायां दत्तश्रुतयोरन्त उदात्तश्चेत्तर्हि कारकादेवेति विपरीतनियमस्यापत्तौ संश्रुत इत्यादौ अन्तोदात्ततानापत्तेः तदुक्तं मूले कारकावधारणं यथा स्याद्दत्तश्रुतावधारणं माभूदिति ।

नन्वस्मिन् सूत्रे कारकग्रहणं किमर्थम् 'गतिकारकोपपदादि'त्यतः कारकग्रहणानुवृत्त्यैव सिद्धेरिति चेन्न, तथा सति एकयोगनिर्दिष्टानामिति न्यायेन गतिकारकोपपदानामिति त्रयाणामप्यनुवृत्त्यापत्तौ त्रयाणामपि नियमापत्त्या रामायणपाठस्य भावित्वे इष्टव्यवहारे 'सम्भूयादिति सम्भूतो रामायण' इत्यत्र नियमेन अन्तोदात्तत्वव्यावृत्त्यापत्तेः ।

दत्तश्रुतयोः किमिति—एतदभावे 'तृतीयकर्मणि' एतस्याऽपि नियमः स्यादिति देवपालित इत्यत्र 'तृतीयाकर्मणी'ति पूर्वपदप्रकृतिस्वरो न स्यात् । अस्मान्नियमादत्र संज्ञायामनेनेति न भवतीति भावः ।

आशिषि किमिति–अनाशिषि नियमो माभूत्। देवैः खाता वेवखाता श्वभ्रविशेषस्य संज्ञेयम्। आशिष्येवेत्येवमत्रेष्टो नियम इति–आशिष्येवेत्येवमपीत्यर्थः। तेनानाहृतो न इति देवदत्त इत्यत्र न भवति ? आशिषोऽप्रतीतेः।

उभयविधनियमे प्रमाणन्तु 'कारकादत्तश्रुतयोरनाशिषि प्रतिषेधो वक्तव्यः। अनाहृतो न इति देवदत्तः सिद्धन्तूभयनियमात् उभयतो नियमः करिष्यते' इति भाष्यमेव अनाहृता न इति देवदत्त इत्यत्र धनञ्जयसम्बन्धिनः शङ्खविशेषस्य देवदत्त इति संज्ञा। शङ्खविशेषस्य यत्र संज्ञा तत्र देवा एनं देवासुरित्यर्थो न प्रतीयते इति तत्तात्पर्यम्। उदाहरणे च देवदत्त इति न शङ्खस्य संज्ञा अपि तु कस्यचित्पुंस इति भवति आशिषः प्रतीतिरिति तत्त्वम्॥ ९॥

ऊनार्थकलहं तृतीयायाः॥ १०॥

अत्र प्रतिपदोक्तत्वादेव सिद्धे तृतीयाग्रहणं स्पष्टार्थम्, न च धान्यायायं धान्यार्थ इत्यत्र 'अर्थेन नित्यसमास' इति वार्तिकेन समासे तत्र व्यावृत्त्यर्थं तृतीयाग्रहणमिति वाच्यम् ? अर्थे इति पूर्वपदप्रकृतिस्वरः तृतीयासमासे सावकाशममुं स्वरं बाधते इत्यस्य वक्तुं शक्यत्वात्। नच समशब्दस्यार्थशब्देन समासे समार्थ इत्यादौ उत्तरपदान्तोदात्तत्वसिद्ध्यर्थं तृतीयाग्रहणं नहि तत्र पूर्वपदप्रकृतिस्वरप्राप्तिः, समशब्दस्य "तत्त्वसमसिमे"त्यनेन सर्वानुदात्तत्वविधानेनोदात्तस्वरितयोगित्वाभावादिति वाच्यम् ? तत्र पूर्वपदप्रकृतिस्वराभावे समासस्वरेणान्तोदात्तस्येष्यमाणत्वात्।

वस्तुतस्तु तृतीयाग्रहणेनात्र प्रतिपदोक्तपरिभाषाप्रवृत्त्यभावो ज्ञाप्यते। तेन वाचा कृतः कलह इत्याद्यर्थके वाक्कलह इत्यादावन्तोदात्तत्वं भवति। स्पष्टमिदं शेखरे॥ १०॥

एहि मन्ये प्रहासे लृट्॥ ११॥

ननु 'गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत्' इति सिद्धे 'एहि मन्ये प्रहासे लृडि'ति व्यर्थमिति चेन्न ? नियमार्थं तस्य सत्त्वात् नियमाकारश्च एहि मन्ये इत्यनेन युक्तं लृडन्तं नानुदात्तं चेत्तर्हि प्रहासे एवेति। तेन एहि मन्यसे ओदनं भोक्ष्ये इति सुष्ठु मन्यसे इत्यत्र न निषेधः।

ननु मन्ये इत्यनेन युक्तत्वाभावात्कथं नियमप्राप्तिरिति चेन्न, एहि मन्ये इत्यस्य 'प्रहासे चे'ति सूत्रविहितलटोऽनुवादत्वेन धातुमात्रस्य विवक्षितत्वात् ।

भाष्यात्तु एहि मन्ये रथेन यास्यसीति नियमफलं प्रतीयते । एहि त्वं रथेन यास्यसि इत्यहं मन्ये इति च तदर्थः ॥ ११ ॥

पूजनात् पूजितमनुदात्तं काष्ठादिभ्यः ॥ १२ ॥

नन्वत्र पूजनादित्येव प्रत्यासत्त्या ससम्बन्धिकत्वेन च पूजितग्रहणे सिद्धे सूत्रे तद्ग्रहणं व्यर्थमिति चेन्न, अत्र प्रकरणे पञ्चमीनिर्देशेऽपि 'तस्मादित्युत्तरस्ये'ति परिभाषया आनन्तर्यं नोपस्थाप्यत इति ज्ञापनार्थे पूजितग्रहणस्य सत्त्वात् ।

अत एव यदद्र्यङ् वायुर्वातीत्यत्र व्यवहितेऽपि 'यद्वृत्तान्नित्यम्' इति निषेधस्य प्रवृत्तिः । तदाह मूले–पूजनादित्येव पूजितग्रहणे सिद्धे पूजितग्रहणमनन्तरपूजितलाभार्थम् । एतदेव ज्ञापकमत्र प्रकरणे पञ्चमीनिर्देशेऽपि नानन्तर्यमाश्रीयते इति ॥ १२ ॥

तिङि चोदात्तवति ॥ १३ ॥

नन्वत्र तिङ्ग्रणाभावेऽपि गत्याक्षिप्तक्रियावाचकस्योदात्तवतीति विशेषणात् आमन्द्रैरित्यत्र आङो निघातनिवृत्तिसिद्धौ तिङ्ग्रहणं व्यर्थम् ।

ननु कृदन्तेऽतिव्याप्तिः कृत्स्वरे सति गतेर्निघातस्येष्टत्वादिति चेन्न, तदभावे धातुरेव क्रियावाचकत्वाद्गतिसंज्ञानिमित्त मिति यत्र धातोरेवोदात्तत्वं यत्पचतीत्यादौ तत्रैव निघातः स्यात् । तत्र हि यच्छब्दयोगान्निपातैर्यद्यदिति निषेधात् 'तिङतिङ' इत्यस्याप्रवृत्तिः । तत्सत्त्वे तु यं धातुं प्रति गतित्वं तद्घटिते तिङन्त इत्यर्थात् । तिङन्तस्य निघातनिमित्तत्वात्तिङन्तस्योदात्तत्वमपेक्ष्यते इति यत् प्रकरोतीत्यादौ धातोः शेषनिघातेनानुदात्तत्वेऽपि तिङन्तस्य उप्रत्ययस्वरेण मध्योदात्तत्वात् गतेर्निघातः सिद्ध इत्याशयादिति शम् ॥ ११ ॥

इति श्रीमदयोध्यास्थरामगोपालपाठशालाप्रधानाध्यापकन्यायव्याकरणाचार्यपण्डितश्रीरुद्रप्रसादशर्मविरचितं स्वरवैदिकपङ्क्तिविवरणरूपं सम्पूर्णम् ।

———:०:———

परिशिष्ट

पाणिनीय शिक्षामें यद्यपि वर्णादिके लक्षण वर्णित हैं तथापि पाठकोंके कल्याणार्थ संस्कृत तथा हिन्दी दोनों भाषाओंमें उन लक्षणोंका स्पष्टीकरण किया जा रहा है—

वेदाः—धर्मो ब्रह्म चेति वेद्यते–ज्ञायतेऽनेनेति वेदः। वेदाश्चत्वारः सन्ति, ते च–ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्चेति।

धर्म तथा ब्रह्म जिसके द्वारा जाने जाते हैं उसे वेद कहते हैं। वेद चार हैं। जैसे—ऋग्वेदः यजुर्वेद, सामवेद तथा अथर्ववेद।

वेदानां षडङ्गानि—वेदानां षडङ्गानि भवन्ति। तानि च–शिक्षा, व्याकरणम्, निरुक्तम्, छन्दः, कल्पः, ज्यौतिषञ्चेति।

वेदके छः अङ्ग हैं। जैसे–शिक्षा, व्याकरण, निरुक्त, छन्द, कल्प तथा ज्यौतिष।

शिक्षा—शिक्ष्यन्ते वर्णाः शिक्ष्यते च वर्णोच्चारणविधिर्यया सा शिक्षा।

जिसके द्वारा वर्ण सीखे जाते हैं तथा वर्णोच्चारण विधि सीखी जाती है उसे शिक्षा कहते हैं।

अक्षरम्—न क्षरति = अविनश्यतीति अक्षरम्।

जिसका क्षय नहीं होता अर्थात् विनाश नहीं होता है उसे अक्षर कहते हैं।

वर्णाः—वर्ण्यते भावो यैस्ते वर्णाः, अक्षरस्य पर्यायोऽयम्। यथा—अल् प्रत्याहारः।

जिनके द्वारा भावका विस्तार हो उन्हें वर्ण कहते हैं। वर्ण शब्द अक्षरका पर्याय है। जैसे—अल् प्रत्याहार।

स्वराः—स्वयमेव राजन्ते = स्वेन रूपेणान्यवर्णसाहाय्येन विना राजन्ते = उच्चार्यन्ते इति स्वराः। यथा–अच् प्रत्याहारः।

जो बिना किसी अन्य वर्णकी सहायता से उच्चरित हो उन्हें स्वर कहते हैं। जैसे–अच् प्रत्याहार।

व्यञ्जनम्—व्यञ्जयन्ति स्फोटात्मकस्वरूपमिति व्यञ्जनम्। अन्वग्भवति वा। यथा–हल् प्रत्याहारः। ह् + अ = ह। 'ह्' अत्र व्यञ्जनम्।

स्फोटात्मक स्वरूपके व्यञ्जकको व्यञ्जन कहते हैं, अथवा जो स्वरकी सहायतासे उच्चरित हो उसे व्यञ्जन कहते हैं। जैसे–हल् प्रत्याहार। ह् + अ = ह। 'ह्' यहाँ व्यञ्जन है।

अयोगवाहः——अयोगेनैव वहति कार्यमिति अयोगवाहः। यथा—अं, अः इत्यनुस्वारविसर्गौ अयोगवाहौ।

'अ'के योगसे कार्यका जो वहन करे उसे अयोगवाह कहते हैं। जैसे–अं, अः। 'अ'के ऊपर तथा बगलमें रहनेवाले अनुस्वार तथा विसर्ग अयोगवाह हैं।

अनुस्वारः—स्वरमनु प्रयुज्यते इति अनुस्वारः। यथा–अं। अत्र 'अ'स्य पश्चात् अनुस्वारस्य (ं) उच्चारणं भवति। अपि च सर्वदा स्वरस्योपरि प्रयुज्यते।

स्वरके बाद जिसका प्रयोग हो यथा उच्चारण हो उसे अनुस्वार कहते हैं। सर्वदा इसका प्रयोग स्वरके ऊपरमें बिन्दुरूपसे किया जाता है। यथा–अं।

विसर्गः——विसृज्यते वाक्यमनेनेति विसर्गः, विवधं वा सृज्यते शत्व-षत्व-सत्वाद्यादेशरूपैरिति विसर्गः। यथा–अः। अत्र 'अ'स्य पश्चात् पार्श्वभागे स्थितं विन्दुद्वयं (:) विसर्ग उच्यते।

जिसके द्वारा वाक्यकी विशेष रूपसे सर्जना की जाती है उसे विसर्ग कहते हैं अथवा जो श, ष, स आदि आदेश रूपोंसे विविधताकी सर्जना करता है उसे विसर्ग कहते हैं। जैसे–अः। यहाँ 'अ'के बाद बगलमें स्थित विन्दुद्वयको (:) विसर्ग कहते हैं।

मात्रा——निमेषकालो मात्रा उच्यते।

आँखके स्वाभाविक रूपसे खुलने-बन्द करनेसे जितना समय लगता है उसे मात्रा कहते हैं।

ह्रस्वः——एकमात्रिको ह्रस्व उच्यते।

एक मात्रावालेको ह्रस्व कहते हैं।

दीर्घः——द्विमात्रिको दीर्घ उच्यते।
दो मात्रावालेको दीर्घ कहते हैं।

प्लुतः——त्रिमात्रिको प्लुत उच्यते।
तीन मात्रावालेको प्लुत कहते हैं।

उदात्तः——उच्चैरुच्चारित उदात्त उच्यते।

तालु आदि सभाग स्थानोंके ऊर्ध्वभागमें उच्चरित स्वर उदात्त कहलाता है।

अनुदात्तः—नीचैरुच्चारितोऽनुदात्त उच्यते।

तालु आदि सभाग स्थानोंके निम्न भागसे उच्चरित स्वर अनुदात्त कहलाता है।

स्वरितः——मध्योच्चारितः स्वरित उच्यते ।
मध्यभागमें उच्चरित स्वर स्वरित कहलाता है ।

अनुनासिकः——मुखसहितनासिकयोच्चारितोऽनुनासिक उच्यते । यथा——ञ, म, ङ, ण, न इत्येते, 'अँ'स्योपरिस्थितानुनासिकश्च (ँ) ।

मुखके साथ नाकसे उच्चारण किये जानेवालेको अनुनासिक कहते हैं । जैसे—ञ, म, ङ, ण, न तथा 'अँ' इस 'अ'के उपर में रहनेवाला चन्द्रबिन्दु (ँ) ।

अननुनासिकः——नासिकायोगेन विनैवोच्चारितोऽननुनासिक उच्यते ।
नाकके बिना उच्चारण किये जानेवालेको अनुनासिक कहते हैं ।

स्पर्शाः——स्पृशति करणं स्थानं येषामुच्चारणे ते स्पर्शाः । यथा——ञय् प्रत्याहारः ।

जिनके उच्चारणमें करण तथा स्थानका स्पर्श हो उन्हें स्पर्श कहते हैं । जैसे——ञय् प्रत्याहार ।

अन्तःस्थाः——येषां वर्णानामुच्चारणे मध्ये स्थितं करणं ते अन्तःस्थाः । यथा——यण् प्रत्याहारः ।

जिन वर्णोंके उच्चारणमें करण मध्यमें स्थित रहता है उन्हें अन्तःस्थ कहते हैं । जैसे—यण् प्रत्याहार ।

ऊष्माणः—ऊष्मा प्रजायते येषामुच्चारणे ते ऊष्माणः । यथा—शल् प्रत्याहारः ।
जिन वर्णोंके उच्चारणमें ऊष्मा निकलती है उन्हें ऊष्म वर्ण कहते हैं । जैसे—— शल् प्रत्याहार ।

स्थानम्—यत्र वर्णा व्यङ्ग्यत्वेन तिष्ठन्ति तत्स्थानम् । यथा-कण्ठादिस्थानम् ।
जहाँपर वर्ण व्यङ्ग्यरूपसे रहते हैं उसे स्थान कहते हैं । जैसे—कण्ठ आदि स्थान हैं ।

प्रयत्नः——वर्णोच्चारणार्थं प्रयतनं प्रयत्नः ।
वर्णोच्चारणके लिए प्रकृष्ट रूपसे यत्न करना प्रयत्न है ।

करणम्——प्रयत्नसाधकं साधनं करणम् ।
प्रयत्नको साधनेवाला साधन करण है ।

स्थानपीडनम्——स्थानेषु वायोः पीडनं स्थानपीडनम् ।
स्थानोंमें वायुके पीडनको स्थानपीडन कहते हैं ।

समाम्नायः——समाहृत्यानीता वर्णा यत्रासौ समाम्नायः ।
जिसमें बर्णोंका संग्रह किया गया है उसे समाम्नाय कहते हैं ।

—: ० :—

शिक्षाश्लोकानुक्रमणिका

श्लोकाः	पृष्ठाङ्काः
अथ शिक्षां प्रवक्ष्यामि	१
अग्निः सोमः प्र वो	२२
अचोऽस्पृष्टाः यणः	१८
अज्ञानान्धस्य लोकस्य	२७
अर्धमात्रा तु कण्ठ्यस्य	१०
अनुदात्तो हृदि ज्ञेयो	२२
अनुस्वारयमानां च	१२
अनुस्वारे विवृत्यां तु	१३
अनुस्वारो विसर्गश्च	४
अन्तोदात्तमाद्युदात्त	२१
अलाबुवीणानिर्घोषः	१२
अवक्षरमनायुष्यं	२५
अष्टौ स्थानानि	७
आत्मा बुद्ध्या	४
ईषच्छ्वासांश्चरो	१६
उदात्तमाख्याति	२१
उदात्तं प्रदेशिनीं	२१
उदात्तश्चानुदात्तश्च	७
उदात्ते निषाद	७
उपांशुदष्टं त्वरितं	१७
एवं वर्णाः प्रयोक्तव्याः	१६
ओभावश्च विवृत्तिश्च	८
कण्ठ्यावहाविचुयशाः	६
कण्ठे माध्यन्दिनयुगं	६
कुतीर्थादागतं दग्धं	२३
गीती शीघ्री शिरः	१६
चाषस्तु वदते मात्रां	२३
छन्दः पादौ तु वेदस्य	२०
जिह्वामूले तु कुः	६
ञमोऽनुनासिकाः	१६
त्रिनयनमुखनिःसृताम्	२८
त्रिषष्टिश्चतुःषष्टिः	३
प्रसिद्धमपि	२
प्रातः पठेन्नित्यमुरः	१८
मध्ये तु कम्पयेत्	१५
मन्त्रो हीनः स्वरतो	२४
माधुर्यमक्षरव्यक्तिः	१७
मारुतस्तूरसि	५
यथा सौराष्ट्रिका	१४
यद्योभावप्रसन्धानं	८
येन धौता गिरः पुंसां	२७
येनाक्षरसमाम्नाय	२६
रङ्गवर्णं प्रयुञ्जीरन्	१४
व्याघ्री यथा हरेत्	१३
शंकरः शांकरीं प्रादाद्	२६
शङ्कितं भीतिमुद्घुष्टं	१७
शिक्षा घ्राणं तु वेदस्य	२०
संवृतं मातृकं	१०
सुतीर्थादागतं व्यक्तं	२३
सोदीर्णो मूर्ध्न्यभिहतो	६
स्वरतः कालतः	७
स्वराणामूष्मणां चैव	११
हकारं पञ्चमैर्युक्तं	६
हविषां मध्योदात्तं	२२
हस्तहीनं तु योऽधीते	२५
हस्तेन वेदं योऽधीते	२६
हृदयादुत्करे तिष्ठन्	१५
हृदये चैकमात्रस्तु	१४

अष्टाध्यायीसूत्रपाठः

पूर्वपीठिका-सूत्रविवरणात्मक 'प्रह्लाद' टिप्पणीसहितः

संपादकः—स्गोवामी प्रह्लाद गिरि वेदान्तकेशरी

महर्षि पाणिनिविरचित 'अष्टाध्यायीसूत्रपाठ' का यह सर्वाङ्गपूर्ण संस्करण है। इसमें प्रतिसूत्र व वार्तिक के संयुक्ताक्षरों को अलग-अलग करके सभी सूत्रों को सुवाच्य कर दिया गया है तथा प्रति सूत्र पर अनुवृत्ति तथा अधिकृत पदों को बड़े-बड़े अक्षरों में अंकित करके उनके निकट अनुवृत्ति की अवधि-सूचक सूत्र-संख्या भी दी गई है और आवश्यक स्थलों पर वार्तिक का भी उल्लेख कर दिया गया है, जो पाठक के लिए अधिक सौकर्य है। टिप्पणी में भी आबाल-बोधगम्य सूत्रों के स्पष्टार्थ लिखे गये हैं तथा परिशिष्ट में कित्, ङित्, टित्, पित् आदि का विशद विवेचन किया गया है, जो अधिक ज्ञानवर्धक है। १२-००

पाणिनीय-

लिङ्गानुशासनम्

सटिप्पण 'प्रह्लाद' संस्कृत-हिन्दी व्याख्यासहितम्

व्याख्याकारः सम्पादकश्च—गोस्वामी प्रह्लाद गिरि वेदान्तकेशरी

शब्दोंके लिङ्गज्ञानके लिए यह ग्रन्थ सर्वोत्तम है। इसमें अनुवर्तन कर सूत्रार्थ करनेके लिए अनुवर्त्य पदोंका स्थूलाक्षरमें तथा दक्षिण पार्श्वमें अवधि सूचक अङ्क हैं। सूत्रोंके पदच्छेद, समास, वृत्ति, उदाहरण तथा विभिन्न कोष समर्थित शब्दोंके पर्याय दिये गये हैं। आस[illegible]से शब्दान्वेषणके लिए शब्दोंकी सूची दी गयी है। टिप्पणीमें अपवाद सूत्रोंका विवेचन है। ६-००

सनत्सुजातीयम्

सविमर्श 'प्रह्लाद' संस्कृत-हिन्दीव्याख्यासहितम्

व्याख्याकारः—गोस्वामी प्रह्लाद गिरि वेदान्तकेशरी

प्रस्तुत ग्रन्थ दर्शनशास्त्रोंमें महत्त्वपूर्ण स्थान रखता है। सुबोधगम्यहेतु प्रस्तुत संस्करणमें श्लोक, अन्वय, प्रसङ्ग, व्याख्या, संस्कृत भावार्थ, हिन्दी अनुवाद तथा विमर्शमें आलोचनात्मक प्रामाणिक विवेचन प्रस्तुत किया गया है। आलोचनात्मक [illegible] विस्तृत भूमिका दी गयी है कि जिसमें दर्शनके सिद्धान्तका विवेचन किया गया है, जो कि अबतक इस प्रकारके एकत्र अनुपलभ्य था। १२-००

महिम्नस्तोत्रम्

हरिहरपक्षीय 'मधुसूदनी' व्याख्यासहितम्

सम्पादकः—गोस्वामी प्रह्लाद गिरि वेदान्तकेशरी

प्रस्तुत ग्रन्थमें विष्णु तथा शिव—दोनों पक्षोंमें श्लोकोंका अर्थ किया गया है। साथमें [illegible]न्नका विशद विवेचन प्रस्तुत है। ३-००

प्राप्तिस्थानम्—चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-२२१००१